९८
५५

पालिजातकावलि

2525अ
शर्मा।पा।पा

श्री बटुकनाथशर्मा, एम० ए०
साहित्योपाध्यायः

Pali Jatakavali

(A SELCTION FROM PALI JATAKAS)

EDITED WITH

A Critical Introduction, Sanskrit Chhaya, Hindi translation, A Synopsis of Grammar and A Full Pali Glossary

By

PANDIT BATUKNATH SHARMA, M. A.,
SAHITYOPADHYAYA,
Head of the Sanskrit Department,
Banaras Hindu University
Varanasi.

PUBLISHED BY

MASTER KHELARILAL SANKATA PRASAD

Sanskrit Pustakalaya

P. Box No. 97

Kachauri Gali, Varanasi-1

Price Rs 6-50

[All rights reserved by the publisher.]

* श्रीः *

पालिजातकावलिः

काशीस्थहिन्दूविश्वविद्यालयीय-संस्कृतविभागाध्यक्षेण, साहित्यो-पाध्यायपदवीभृता, एम० ए० इत्युपाधिधारिणा,

श्रीबटुकनाथशर्म्मविरचितया

संस्कृतच्छायया‌ऽलङ्कृता

तेनैव निर्मितैर्भाषानुवाद-पालिव्याकरणसंक्षेप-पालिपाठ-पदोच्चयादिभिः समुद्भासिता

प्रकाशकः

मास्टर खेलाड़ीलाल संकटाप्रसाद

संस्कृत पुस्तकालय, कचौड़ीगली,

वाराणसी–१

मूल्यम् रु० ६-५०

प्रकाशक :
मास्टर खेलाड़ीलाल संकटाप्रसाद
पो० बा० नं० ६७,
कचौड़ीगली, वाराणसी–१
[फ़ोन : ६३०१५]

दशम संस्करण : जनवरी १६७८ ई०

मुद्रक :
मास्टर प्रिण्टिग प्रेस,
बुलानाला, वाराणसी–१

किमपि प्रास्ताविकम्

प्रवर्तन्तेऽवतारास्ते यत्कारुणिकलितो दश ।
सा मे मतिबलं दद्यादपि दाशबलागमे ॥

ग्रन्थानधीत्य विविधानधि बुद्धवाचं
वादांश्च चेतसि विचार्य विभिन्नभावान् ।
विद्यार्थिवेद्यविषयं मितया गिरैव
प्रस्ताविकं किमपि लेखितुमत्र यत्नः ॥

अस्यां प्रस्तुतपुस्तिकायां जातककथाभ्यो विंशतिः कथा समादाय विदुषां पुरः सांप्रतं प्राप्यन्ते । एतास्ता जातककथाः 'पाली' इति प्रसिद्धायां भाषायां समुपनिबद्धाः समुपलभ्यन्ते । संप्रति सर्वेभ्यः पूर्वमयमेव प्रश्नः समुत्तिष्ठति केयं पाली नाम भाषेति । प्रश्नश्चायं कुतूहलविशेषेण संवलितः । प्रायशो जगतीतलेऽखिलेऽपि व्यक्तमेवेदं दरीदृश्यते यद्भाषाभिधानानि जनानां जनपदानां या नामभ्यः प्रवर्तन्ते । नेदं खलु भाषाविज्ञानविदामेव वेद्यो विषयः । वयमपि द्रष्टुं पारयामो यद् 'बङ्गानां भाषा 'वङ्गला' इत्युच्यते । गुर्जराणां 'गुजराती', महाराष्ट्राणां 'मराठी', काश्मीराणां 'काश्मीरी' इत्यादयो व्यपदेशास्तमेव सिद्धान्तं स्थिरीकुर्वन्ति । नैवाद्यत्व एव भवति भाषानामीदृशः समयः । पुराऽपि सूरसेनानां भाषा 'शौरसेनी' इति, मगधानां 'मागधी' इति महाराष्ट्राणां 'महाराष्ट्री' इति नामभिरेव व्यवाह्रियन्त । संप्रत्यपि तास्तथैवोद्दिश्यन्ते । तत् पालीति नामधेकेनाऽपि देशविशेषण जनपदविशेषेण वा दुरनुसन्धेयसम्बन्धत्वात् चित्रमिव किमपि चित्ते प्रतिभाति ।

अत्र सन्ति विविधा विप्रतिपत्तयो विदुषां भाषाविज्ञानजुषाम् । तत्र काश्चित कपोलकल्पनाऽकुलितयथार्थभावा भारतीयानां मतिपथं यथातथमारोढुं नव समर्थः । तदन्या अपि यद्यपि मान्यानां मतिमतां मस्तिष्कपरिष्कारवत्यः

समुत्कर्षन्ति जनानां मानसम्, तथाऽपि नैवाऽस्माकं हृदये परं प्रत्ययं समुत्पादयन्ति। तदत्र तास्ताः कल्पनानुकूलितकलेवरा वाचोयुक्तीः परित्यज्य विश्वासार्हयैव सारण्या पालिशब्दार्थविचारोऽत्र तावत् प्रस्तूयते।

अथ भगवान् बुद्धो यदा चिरसमाधिसिद्धिं सम्यग्ज्ञानरूपां 'बोधिं' लब्ध्वा चिरानुभूतां 'बोधिसत्त्व' इति पदवीमुल्लङ्घ्य बुद्धतामध्यरुक्षत्, तदाऽस्य परमकारुणिकतया लोकं शोकसन्तानादुद्धर्तुं बलवती मतिः प्रादुरभूत। समाधिषु स्वानुभूतं तत्त्वं साधु समाधाय तदेव जनेष्वपि प्रख्यापयितुं स शास्ता भगवानियेष। काश्यामेव किल तस्योपदेशरूपं प्रथमं प्रवचनं जनैरश्रूयत। प्राकृतैरपि जनैर्मदीयोपदेशामृतं यथेच्छं निपीयतामिति सकरुणया मत्या व्यवसायिताशयो लौकिक्यैव गिरा स समुपदिदेश महापुरुषः। का नाम सा लौकिकी वाणी या भगवता तदर्थं संभाविता? असंशयमियमासीत् मगधेषु तदानीमुपयुज्यमाना काचिद् भाषा। मागधो हि बभूव भगवान् बुद्धः[1]। तस्य मगधदेशोत्पत्तिस्तु सर्वतो विश्रुतैवास्ते। सा भाषाऽपि मागधीत्येवोच्यताम्। किन्त्वत्रावधेयमिदम्। नैषा प्राकृतव्याकरणेषुप्रसिद्धा मागधी भवितुमर्हति[2]। इयमतिप्राचीना साऽतीवार्वाचीन। उभयविनिगमनाय विद्वद्भिरेका 'बौद्धमागधी' इत्युच्यते। तदितरा 'प्राकृतमागधी' इति नाम्नाऽभिधीयते। इयं पुनर्बौद्धमागधी जैनानामागमभाषातः स्फुटमेव विभिद्यते। सा 'अर्द्ध[3] मागधी' इति प्रसिद्धाभिधानं भजते। भगवान् महावीरो मागधोऽपि भूत्वा शुद्धां मागधीं नैवोपायुङ्क्तेति 'अर्द्धमागधी' इति शब्देनैव स्फुटं प्रतीयते। इयं कथाऽप्यन्यया भाषया मिश्रिता मागधीति मन्यन्ते बहवो विद्वांसः। कल्पयन्ति च ते

तदुक्तं सासनवंसे—

१—"सो च भगवा मागधो मगधे भवत्ता, सा च भासा मागधी" इत्यादि।
विस्तरार्थं विलोक्यताम् पाली-प्रकाशः, पृ० १३

२—तदुभयभेदावधारणाय विलोक्यताम्—पाली-प्रकाशः, पृ० १४

३—अर्द्धमागधीविशेषावबोधाय दृश्यताम्—
Ardhamagadhi Reader by Banarasi Das Jain,
Woolner : Introduction to Prakrit.

शिष्यद्वयसाहाय्यसमुद्भूतं सौभाग्यं स्वयमेव समुपनतं समुद्वीक्ष्य सहर्षमहमस्मिन् प्रयासविषमेऽपि कार्ये सोत्साहं प्रावर्तिषि।

अस्यां पालिजातकावल्याम् प्रथमं स्वल्पविस्तरा प्रस्तावना समुपन्यस्ता। अतिविस्तरोऽयं विषयः। समोलोचनीयोऽत्र बहुविधोऽर्थसार्थः। किन्तु परिचयावस्थायां पालिसाहित्यप्रविविक्षूणां छात्राणां नैवोपकाराय भवेदतिपृथुलाकारा भूमिका काऽपीति मनसि विभाव्य परमप्रयोजनीयामेव विषयानामत्र मया संनिवेशो विहितः। कथांशः सुखेनावबुद्धः स्यादिति कथासंक्षेपः स्वल्पैरेवाक्षरैर्विलिख्य प्रथममेवाऽत्र निक्षिप्तः। तदनन्तरं दक्षिणपार्श्वे पालिपाठो वामपार्श्वे तत्संस्कृतच्छायां इति क्रमेण विंशतिर्जातककथा दत्ताः। संस्कृतच्छाया छात्राणां महोपकाराय भविष्यतीति भृशमाशासे। अत्रेदमवधेयम्। नाऽत्र शब्दसौष्ठवमधिष्ठाय संस्कृतं लिखितम्। शिथिलप्रायमेवाऽत्र सन्धिबन्धनम्। कारकादिष्वपि पालिच्छायामुल्लंघ्तुं नैवाकारि बलीयानाग्रहः। यथा पालिपाठोऽनायासेनैव संस्कृतज्ञानामवबुद्धो भवेत्तथैव बहुधा विहितो यत्नः। एतदग्रे "जातकत्थवण्णना, इति प्रसिद्धटीकातः केचनांशाः समुद्धृत्य समुपन्यस्ताः। संस्कृतच्छात्राः पश्येयुरेतैः कथमिव नालीटीकाकारा व्याख्यान्ति प्राचीनान् स्वधर्मग्रन्थानिति। अर्थस्फटीकरणेऽपि सांप्रदायिकमतप्रदानेनेमे बहु सहाय्यमाचरिष्यन्ति च्छात्राणाम। तदनु भाषानुवादोऽत्र निहितः। कानिचिद् पालिवाक्यानि तत्क्षणमेवापरिचितसंघटनया न स्फुटीभवेयुरिति कथांशस्त्वरितमेव मतिपथं नावतरेदिति चाऽऽलोच्य भाषाऽनुवादोऽपि पदमत्र प्रापितः। बाढं विश्वसिमि यदयमपि हिताय सम्पत्स्यते। अनालोकितव्याकरणालोको लोको न खलु किमपि विभावयति तमसि लीन इवेति विचार्य पालिव्याकरणस्य परमोपादेया अंशा अपि तदनन्तरं समुपन्यस्ताः। अस्याखिलस्यान्ते पालिपाठपदोच्चयरूपेण पालिजातकावल्यामागतानां शब्दानां सप्रमाणार्थसार्थोपबृंहितः कोशोऽपि समुपपेशितः। इत्थमियत्प्रपञ्चव्यसंचितं पुस्तकमिदं बुद्धवचनशुश्रूषूणां बोधोद्बोधाय भविष्यतीति भवति मे मनसि विश्वासावकाशः।

अस्यां पालिजातकावल्यां स्वीकृतपालिपाठमधिकृत्य स्वल्पं किमपि वक्तुं समुचितमेव। सर्वप्रथमं पालिपाठावलीं पुरोऽवस्थाप्य प्रक्रान्तमिदं कार्यम।

किन्तु पदे पदे प्रमादस्थानानि शङ्कनीयानीत्युपलभ्य तदुपजीव्यः विद्वद्वर-'एण्डर्सन' सङ्गृहीतः 'पालि रीडर' इत्याख्योऽपि ग्रन्थः सन्निहितो व्यधायि । तत्राऽपि क्वचिन्न् क्वचित् स्खलितमिव किमपि साशङ्कमुत्पश्यता मया 'फोसबोल' इति सुगृहीतनामधेयैः पालिमहापण्डितैः प्रकाशितः पञ्चभागात्मकः 'अत्थवण्णना' इत्याख्यया टीकया सहितः पालिजातकनिकर एव समवलम्बितः । अहो अध्यवसायः फोसबोलपण्डितस्य ! तत्कृतिः सत्यमेव चमत्करोति चेतः ।

अस्या जातकाल्याः पाठादिनिर्णये तथा चान्येष्वपि विषयेषु येषां पुस्तकलेखादिभ्यः साहाय्यमासादितं तेषामुपकारं सप्रश्रयं कृतज्ञनान्तःकरणेन पुनः पुनः स्मरामि । यथास्थानं प्रस्तावनायां च यथाशक्ति पुनरपि तेषामुपकारस्मरणं नामग्राहं यतिष्ये । यदीयसाहाय्येनेदं कार्यं सम्भावित-पदमुपनीतं तमहं चिरञ्जीविनं श्रीरामशङ्करमिश्रं कैः शब्दैरभिनन्दामि ? अयं वत्सोऽचिरादेव विद्याप्रसादमासादयेदित्येव मे श्रीमातुश्चरणयोः सप्रश्रयो ऽनुनयः । श्रीमतो मन्नालालस्याप्युपकृतिर्नैव विस्मर्तुमर्हा । श्रीविश्वनाथोऽस्य सर्वथा कल्याणं कुर्यादित्येव मे हृदयगताऽऽशीः ।

येषामुपकृतिः शब्दव्यापारेण प्रकाशयितुं नैव कदापि पार्यते तेषां श्रीगुरु-चरणानां ससमादरं सप्रश्रयं स्मरणमेवास्मादृशां शरणम् । यन्मादृशोऽप्यकिञ्चन-श्चितिचन्द्रिकाकणान् कथमपि विचेतुमलं स्यात् तत्र श्रीगुरुचरणामनुग्रह एव सर्वप्रधानं कारणम् ।

यत् प्राकृतेष्वपि मतिर्विषयेषु मोहं याता न मेऽपि बटुकस्य न तत्र चित्रम् ।
जागर्ति मानसविषापहरोऽनिशं मे, श्री भालचन्द्रचरणाम्बुजसंप्रसादः ॥
यो वस्तुतोऽति विबुधोऽत्र महामहोपाध्यायोऽभियुक्तशरणीकृतपादपद्मः ।
सोऽयं सदागमसुधार्णवकर्णधारः, श्रीलक्ष्मणोऽस्तु हृदये मम पूज्य पूज्यः ॥

दीपावली, १९९७

विदुषां वशंवदो
बटुकनाथशर्मा

अनुक्रमणिका

प्राकथनम्
भूमिका
कथासंक्षेपः
पालिजातकानि संस्कृतच्छायानि २—६१

(१) शिशुमारजातकम् १
(२) वानरेन्द्रजातकम् ६
(३) वकजातकम् १०
(४) सिंहचर्मजातकम् १४
(५) राधजातकम् १८
(६) नृत्यजातकम् २०
(७) उलूकजातकम् २४
(८) कुरङ्गमृगजातकम् २६
(९) यवशकुनजातकम् ३०
(१०) शशजातकम् ३४
(११) मृतभक्तजातकम् ४०
(१२) बावेरुजातकम् ४६
(१३) वलाहाश्वजातकम् ५०
(१४) सूर्पारकजातकम् ५४
(१५) शीलानिशंसजातकम् ६६
(१६) चर्मशाटकजातकम् ६८
(१७) उत्संगजातकम् ७२
(१८) वैदर्भजातकम् ७४
(१९) राजाववादजातकम् ८२
(२०) मखादेवजातकम् ८८

जातकत्थवण्णना (समुद्धृता अंशाः) ९२—१०१
भाषानुवादः १०२—१५२
पालिव्याकरणसंक्षेपः १५३—१६१
पालिपाठपदोच्चयः १६३—१८२

प्राक्कथनम्

स्मृताऽपि मानसोल्लासं तनुते सहसैव या।
सा सदालोकदा काचित् स्याच्चिदानन्दचन्द्रिका ॥

इयमद्य पालिजातकावलिर्यथामति सम्पाद्य नीयते नयनगोचरतां विशद शेमुषीजुषां विदुषाम्। इदमनु किमपि परिचाययितुमिव निवेदयेयमिति मतिं विधाय प्रवृत्तोऽहमिदं प्राक्कथनं लेखितुम्। यावदन्यद् गदितुं समुपक्रमे तावदादौ कथयामि कथमयमहं सम्पादनभारममुमूरीकर्तुमपारथम्। एतदर्थं प्रार्थितोऽभूवं मदन्यतमेन च्छात्रेण श्रीमताऽऽयुष्मता मन्नालालेन। कारणैरनेकैः समुदितैः संप्रति मे दुष्करमेव भवति स्वल्पमपि किमपि कार्यजातम्। अवश्यकर्तव्यतयाऽऽपतितेषु बहुविधाध्ययनाध्यापनादिकार्येषु व्यासक्तचित्तत्वात् तन्मे दुष्करतरत्वमेवोपपद्यते। तदस्मिन्नेवमुपस्थिते दुःस्थे व्यतिकरे, सत्यमेवान्वभावि किमपि विचित्रं दोलाधिरोहणसुखं ममान्तःकरणेन। यदि नोरीकरोमि तदर्थितं, विहन्यते प्रियशिष्यप्रणयः। अथाङ्गीकरोमि चेत्, समासाद्यते महानायासः। किमत्र कर्तुं युक्तं स्यादिति चेतसि विचिन्तयता मया प्रसङ्गादुक्तोऽयं विषयो मदन्तेवासिने चिरञ्जीविने श्रीरामशङ्करमिश्राय। परमसंमदमगमन्मदीयं हृदयं यदाऽनेन सत्यपि निजे महत्यध्ययनीये विषये प्रतिश्रुतं मह्यमावश्यकं साहाय्यकम्। इतः परमपि दैवेनानुकूल्यमुल्लासितम्। असकृदनुभूतचरमेवेदं यदतीव चक्षुरुत्क्षोभवति सूक्ष्माक्षरसंशोधनकार्यम्। तदिदं ममाङ्गुलिनिदर्शनेनेव निदेशेन यथाशक्ति समनुष्ठितं श्रीमन्नालालेन। इत्थं कोविदा यद् भगवता महावीरेण प्रभूतश्रोतृणां सुखावबोधाय स्वयमेव तादृशीं

भाषा विनियुक्ता[1]। यथा तथा वा भवतु, इयं बौधमागधी जैनानामर्द्ध-मागधीतो विभिन्नेत्यर्थोऽनेकैः प्रमाणैः साधु समर्थ्यते[2]। इयमेव बौद्धमागधी पश्चात् 'पाली' इति प्रथां प्राप्तवतीति निर्विवादप्रायम्[3]।

अधुना 'पाली' इति शब्दस्य कोऽर्थ इत्येव विचारयितुं प्रवर्तेमहि। पालिशब्दो यथा संस्कृते तथैव बौद्धमागध्यामपि 'पङ्क्ति' इत्यर्थे प्रयुक्तो बहुशोऽवलोक्यते। तथा चोक्तमभिधानप्पदीपिकायाम्—"पन्ति वीथ्यावलिस्सेनि पालि रेखा च राजि च।" सांप्रतमपि पण्डितमण्डलीषु संस्कृतच्छात्रसंघेषु च विविधानीदृशानि वाक्यानि श्रवणगोचरतां नीयन्ते। 'तात्पर्यार्थस्तु गृहीतः, किन्तु पङ्क्तिर्न द्याऽपि साधु स्फुटीभूता'; 'यदि परीक्षासु साफल्यं पूर्णमपेक्षसे, तर्हि पङ्क्तिषु विशेषेणावधानं देहि'; 'यथोच्यते श्रीमद्भिस्तथैवास्तां तावद्, किन्तु कथमेतत्पङ्क्तितोऽवसीयत इत्येव न खलु सम्प्रधारयामि'। नैवाधुनैवेदृशः प्रयोगोऽस्मावस्ववतीर्णः, पूर्वाचार्याणामपि लेखेषु सोऽवलोक्यत एव। यथा तैत्तिरीयारण्यकभाष्ये भट्टभास्करः 'उमन्तु इति आस्तारपङ्क्तिः प्रणवोपासने विनियुज्यते।" यथा च कौटिलीयार्थशास्त्रस्योपोद्घाते "कौटिलीयार्थशास्त्रपङ्क्तिरुदाहृता दृश्यते।"

यथा पङ्क्तिशब्दः संस्कृते 'मूलगन्थ' इत्यर्थे प्रयुक्तो दरीदृश्यते तथैव तस्मिन्नेवार्थे पालिशब्दो बौद्धमागध्यां प्रयुक्तेऽवलोक्यते। यथा महावंसे (महावंशे) बुद्धघोषकृतामत्थकथामुद्दिश्य प्रोक्तम् "थेरियाचरियासव्वे पालिं विषयतमग्गहुं (स्थविर) आचार्याः सर्वे पालिमिव तामग्रहीषुः यथा च सासनबंसे (शासनवंशे)— 'जम्बूद्दीपे पन पालिमत्तं येव अत्थि अट्ठकथा पन नत्थि (जम्बूद्वीपे पुनः पालिमात्रमेवास्ति, अर्थकथा पुनर्नास्ति) अलमतिविस्तरेण एतावतैव मतिमतामिदं व्यक्तं भविष्यति यत् पालिशब्दः प्रथमं मूलग्रन्थार्थे प्रयुक्तो बभूव। तदनु मूल-

1—Bhandarkar, R. G.—Wilson Philological Lectures.

२—अवलोक्यताम्—पालीप्रकाशः, पृ० १६
Geiger, W-Pali Sprache and Literatur.

३—प्राकृतमागधीकृते विलोक्यताम्—
Banerji,-Sastri, A—Evolution to Magdhi.

ग्रन्थसम्बद्धा ये चान्ये ग्रन्थास्तानपि बोधयितुमयं पालिशब्दः सर्वथाऽलमभूत् । मूलग्रन्थबौद्धानामेतेषां त्रिपिटकः । तत्सम्बद्धा ग्रन्थास्तु तदर्थकथास्तदन्ये च साक्षात् परम्परया वा तदनु गणतामावहन्तो ग्रन्थाः । एते सर्वे पालिशब्दवाच्या बभूवुः । ये पुनस्त्रिपिटकतश्च तदनुबद्धग्रन्थेभ्यश्च विभिन्ना बभूवुस्ते नैव समयेऽस्मिन् पालिशब्दवाच्यतां कदापि प्रापुः । तथा चोक्तं सासनवंसे (शासनवंशे)—
"एते (महावंश) प्रभृति पालि मुत्तक वसेन वुत्ता गन्धातरानि वुच्चति ।"
–एते (महावंशप्रभृतयः) पालिमुक्तकवशेन वियुक्ता ग्रन्थान्तराणीत्युच्यन्ते ।

एवं पालिशब्दा 'मूलग्रन्थं' द्यातयति स्मेति स्पष्टमेव । कालक्रमेणाऽयं पालिशब्दो यस्यां मूलग्रन्था लिखितास्तामेव भाषां बोधयितुं प्रवृत्तोऽभूत् । पालिर्मूलग्रन्थस्तस्य भाषा पालिभाषा । भाषापदवियुक्तेऽपि पालिशब्दो भाषाया वाचको बभूव । तथा चोक्तं सासनवंसे (शासनवंशे)—"इच्चेवं पालिभाषाय परियत्ति परियत्तिता" (इत्येव पालिभाषायां परियत्तिं परियत्तिता ।)

यदा प्रवृत्तः पालिशब्दो भाषाविशेषं द्योतयितुं तदाऽस्य शनैः सर्वतनोऽर्थोऽपि ततः पर्यहीयत । यत् किञ्चिदपि पालिभाषायां लिखितमभूत् तत् सर्वं पालिपदवाच्यतामगच्छत् । अथ कस्मिन्नवसरे प्रवृत्तिरियंपालिशब्दस्यार्थान्तरे प्रयोक्तुं प्रादुरभूत इति प्रश्नो दुरुत्तर एव । चाइल्डर्स[1] महोदयस्य मतेन प्रथमं द्वितीयं वा खिष्टाब्दशतकमेतस्य समयः । किन्तु तदुदाहरणानि बुद्धघोषात् पश्चादेव लिखितेभ्यो ग्रन्थेभ्यो बहुशः समुपलभ्यन्ते । बुद्धघोषस्तु[2] पञ्चमशतकेऽभूदिति विदुषां मतम् । अतः सम्भाव्यते तदनन्तरमेव बौद्धाः स्वग्रन्थभाषां पालिशब्देन प्रवक्तुमुपचक्रमिरे ।

'पालिशब्दवतन्ति' शब्दोऽपि मूलग्रन्थार्थे बुद्धवचनेषु प्रयुक्तो बहुशो प्राप्यते । उभावपि शब्दौ पङ्क्तिवाचकत्वात् प्रायः सदानार्थाविव । उभावपि तथा प्रयुक्तावपि दृश्यते एव । किन्तु भाषाविशेषवाचकत्वं तु पालिशब्देनैवोपलब्धम् कथमिदमभूदिति सम्प्रति निर्णेतुमशक्यप्रायम् । स्यादत्र वक्तॄणां प्रवृत्तिरेव प्रधानं कारणम् ।

1—Childers, R. C.—Dictionary of the Pali Language.
2—Winternitz, M.—History of literature, Vol. II.

मूलग्रन्थवाचकः 'पाली' इति शब्दो कुतस्तद्भाषाया वाचकत्वं प्रापित इत्यपि प्रश्नः साधु समाधातुं नैव सम्प्रति सत्प्रतिपत्तियुक्तैरप्यभियुक्तैः कथमपि पारितम्। इदमेवानुमातुं शक्यते यत् परिक्रामति सर्वाक्रमणशीले भगवति काले विस्मृतपदवीमुपगच्छत्सु च बौद्धवचनेषु बौद्धा यथावत् तद्रक्षणकार्याविबुद्धा यथा तदर्थे तथैव तच्छब्देऽपि समवधानं बबन्धुः। एवं समप्राधान्यं शब्दार्थयोः समुपसर्पति मानसे बौद्धकोविदानां नैतच्चित्रं यदेक एव वाचकतामभजत तदुभयस्य। यद्वा तद्वा भवतु, कथमपि वा तत् सम्भवतु, इद्वं तु निर्विवादमिव नः प्रतिभाति यत् पालिशब्दो मूलग्रन्थवाचकतां वहन्नपि तद्भाषावाचकत्वमपि कालक्रमेण प्रापत्।

पूर्वमेव निवेदितं यत् प्राच्याः प्रतीच्याश्चोभे विद्वांसः पालिशब्दनिरुक्तावप्रतिमं प्रतिमानं प्रादर्शयन्। केऽपि पाटलिपुत्र इत्यत्र प्रयुक्तात्पाटलिशब्दात् पालिशब्दो व्युत्पन्न इति मन्यन्ते। तदितरे 'पल्लि' इत्यस्मात् पालिशब्दस्योत्पत्तिमीहन्ते। ततोऽप्यन्ते मगधप्राचीनाभिधानात् 'पलास' इत्यस्मात् वाञ्छन्ति पालिशब्दावतारम्। किमधिकं ब्रूमहे यदा 'पलेष्टाइन' 'पलटिन' इत्यादिभिरपि पदैः पालिशब्दस्य सम्बन्धोऽवबुध्यते। अलमेतैरतिमतिविकर्षितचित्तैः। पालिवैयाकरणास्तु—'सद्दत्थं पालेतीति पाली' इत्थमवोचुः। भवतु कल्पनाप्रसूतमेव व्याकृतिनिरतानां निरुक्तमिदम्। किन्तु सर्वथेदमसगतमित्यपि वक्तुं नैव शक्यते[1]।

अलं विवादग्रस्तविषयमत्रोत्थाप्य। इदमेवावधेयम्। पालिशब्दो भाषाविशेषं बोधयति। अस्ति पालिर्नाम भाषा। अस्यामेव भाषायां बौद्धानां मूलग्रन्था लिखिताः समुपलभ्यन्ते। इयं भाषा जनानां जनपदानां वा नामधेयात् ... भिधानं स्वकीयं प्राप्तवती। पालिशब्दः प्रथमं मूलग्रन्थस्यार्थे प्रयुक्तो बभूव। ... नन्तरं कालक्रमेण मूलग्रन्थस्य भाषामपि द्योतयितुं प्रचक्रमे।

पालिभाषाया अभिधानमुत्पत्तिं च विचार्य संप्रति तस्यां लिखितानां ग्रन्थानां ... मालोचनं संक्षेपतः समारभेमहि। सांप्रतं द्विविधा हि बौद्धागमाः समुपलभ्यन्ते। तदेके संस्कृतवाण्या समुपनिबद्धास्तदित्तरे पालिभाषया। पालिभाषया सनुद्ग्रथितास्तु ये सन्ति तदागमास्त एव प्राचीनतराः प्रामाणिकतराश्च। ते 'बुद्धवचनानि'

1—Vidyabhusana, S. C.—Pali Grammar.

इति समाद्रियन्ते। कालक्रमेण द्वैविध्यमापतत् प्रधानभावेन बौद्धमतस्य महायानं हीनयानं चेति। बौद्धा अपि द्वैविध्यमभजन्। पालिशासनमनुरुन्धाना दाक्षिणात्या सिंहलब्रह्मादिदेशेषु तावदद्यापि जाग्रत्येव बौद्धाः। चीनमहाचीनप्रभृतिजनपदेषु ये बौद्धा वर्तन्ते तदितरबुद्धानुशासनसम्प्रदायमनुरुध्यन्ते।

पालिभाषाया लिखिता ग्रन्थाः[1] सम्प्रधारणसौकर्याय भागयोर्द्वयोः स्थापयितुं शक्यन्ते। प्रथमे धर्मग्रन्था भवन्ति, द्वितीये व्याकरणादिशास्त्रीयविषया[2] ग्रन्थाः। धर्मग्रन्थाः 'त्रिपिटक' इत्यभिधीयमानेषु भागेषु विभक्ताः प्राप्यन्ते। एतानि ते भवति (१) विनयपिटकम्, (२) सुत्तपिटकम् (सूत्रपिटकम्) (३) अभिधम्मपिटकम् (अभिधर्मपिटकम्)।

(१) विनयपिटकम्

अत्र बौद्धसङ्घस्थानां भिक्षूणां समुपयुक्तान्यनुशासनानि साधु समाहितानि। अयं संग्रहो वैक्रमाब्दात् शतकत्रयपूर्वमेव समुपनिबद्धः सन्त्यस्य त्रयो विभागाः—

(१) सूक्षविभङ्गः।
(२) खन्दकाः (स्कन्धकाः)।
(३) परिवारपाठः।

(२) सूत्रपिटकम्—

भगवतो बुद्धस्य प्रवचनरूपमिदं पिटकम्। वैक्रमाब्दात् सार्द्धशतकद्वयपूर्वमेव प्रादुर्भावमागतमिति विदुषां मतम्। निकायपञ्चकोपपन्नमिदं पिटकम्।

(१) दीघनिकाय (दीर्घनिकायः)।
(२) मज्झिमनिकाय (मध्यमनिकायः।
(३) संयुक्तनिकाय (संयुक्तनिकायः)।

१—विस्तरस्तु ग्रन्थेष्वेतेषु द्रष्टव्यः—
Law, B. C.—History of Pali Literature.
Winternitz, M.—History of Indian Literature, Vol. II.
Hurst, G. L.—Sacretd Literature.

२—अयं विभागः अत्थमालिनीमनुसृत्य दत्तः, गन्धर्वसे तु भिन्न एव दृश्य ते!

(४) अङ्गुत्तरनिकाय (अङ्गोत्तरनिकायः) ।
(५) खुद्दकनिकाय (क्षुद्रकनिकायः) ।

अभिधर्मपिटकम्—

पिटकमिदं किंरूपं किंप्रयोजनं वेत्यत्र विवदन्ते विपश्चितः । तेषां मतान्यालोच्येदमेवावसीयते यदिदं सूत्रपिटकस्य दार्शनिकं प्रतिरूपम् । येऽर्था निकायपञ्चके भगवदुक्ताः प्रवचनरूपेणोपलभ्यन्ते, त एवाऽत्र शास्त्रीयदृशा समवधार्य साधु समाधीयन्ते ।

अस्यैते विभागाः—

(१) धर्मसङ्गणिः ।
(२) विभङ्गः ।
(३) धातुकथा ।
(४) पुग्गलपञ्ञति [पुद्गलप्रज्ञप्तिः] ।
(५) कथावत्थु [कथावस्तु] ।
(६) यमकम् ।
(७) पट्ठान [प्रस्थानम्] ।

नाऽत्र वयं सर्वेष्वेतेषु कमप्याग्रहविशेषं बध्नीमस्तदलमनतिप्रयोजनीयेन विस्तरेण । सूत्रपिटके ये सन्ति पञ्चनिकायास्तेषामन्यतमः क्षुद्रकनिकायः । निकाये सन्ति ग्रन्था अधस्तादुल्लिखिताः ।

(१) खुद्दकपाठः [क्षुद्रकपाठः] ।
(२) धम्मपदम् [धर्म्मपदम्] ।
(३) उदानम् ।
(४) इति वुतकम् [इतिवृत्ताकम्] ।
(५) सूतनिपात [सूत्रनिपातः] ।
(६) विमानवत्थु [विमानवस्तु] ।
(७) पेतवत्थु [प्रेतवस्तु] ।
(८) थेरगाथा [स्थविरगाथा] ।
(९) थेरीगाथा [स्थविरगाथा] ।
(१०) जातकानि ।

तदेवं पश्यामो वयं यत् यतोऽस्यां पालिजातकावल्यां विंशतिर्जातककथाः समुद्गृहीतास्तानीमान्येव जातकानि बुद्धवचनेषु खुद्दकनिकाय (क्षुद्रकनिकायः) नाम योऽस्ति सूत्रपिटकस्यान्तिमो विभागस्तस्य दशमेऽङ्के जातकानि सन्ति समुपनिबद्धानि।

"जातक" इतिशब्दस्य तावत् कोऽर्थः ? जनधातोर्निष्ठान्तो वा भावे क्त इत्यस्मात् वा शब्दोऽयं निष्पद्यते। अतो जातं भूत कथेति यावत्। अथवा 'जातं' जननं जनिः।' भगवान् बुद्धो यदा सम्यग्ज्ञानाधिगमात् सम्यक् सम्बुद्धो बभूव स निसर्गत एव जातिस्मरज्ञानमपि लब्धवान्। सोऽविकम्पेन चेतसा सस्मार सर्वं तत् यदन्वबभूव स प्राक्तनेषु जननेषु। यथाकथाप्रसङ्गं स तानि पूर्वजन्मवृत्तानि भिक्षुभ्योऽचकथत् एतान्येव 'जातकानि' इत्युच्यन्ते। प्रत्नतत्वविदामनुसन्धानेनेदं प्रतीयते यदिदमभिधानं वैक्रमाब्दात् शतकत्रयपूर्वमेव प्राथः प्रसिद्धिमापेदे। तृतीयसंगीतिनिर्धारितत्रिपिटकानि समादाय महाराजाशोकतनयो महेन्द्रो बौद्धमतप्रचाराय सिंहलद्वीपं (Ceylon) जगामेति सुप्रसिद्धमेव। इदमपि च कर्णगोचरीक्रियते यदासीत् कोऽपि टीका जातकानां 'अत्थकथा' इति प्रसिद्धा। सैव गाथां विहाय सिंहलभाषयाऽनूदिता बभूव। सम्प्रति तदुभे अपि नोपलभ्येते सिंहलटीकामधिष्ठाय 'जातकत्थवण्णना' इति प्रसिद्धा पालीटीका निर्मिता बभूव। इयमेव जातकैः समेता फोसबोलपण्डितेन पञ्चसु भागेसु प्रकाश्यं नीता। अस्याः टीकाया भूमिका सुविस्तीर्णा 'निदानकथा[२]' इति नाम्ना सुविख्याता। जातकानामुत्पत्त्यादिविषये वर्ततेऽत्र महान् विचारसंचारः। कथं भगवान् बुद्ध एताः कथाः कथिववान्, कीदृशेषु प्रसंगेषु, कीदृशेष्ववरेषु वा इत्यादिकं तत्रातिविस्तरेण प्रदत्तम्।

१—अधिकावबोधाय डा० विण्टरनिट्ज़ (Winternitz) महोदयस्य 'जातक' इति लेखः 'Encyclopaedia of Religion & Ethics' इति प्रसिद्धे विश्वकोषेऽवलोकनीयः श्रीमता ईशानचन्द्रघोषेणा नूदितानां जातकानां प्रस्तावताऽपि विलोकनार्हा।

२–Rhys David: Birth Stories इत्येतस्य ग्रन्थस्य भूमिकावलोकनीया

एतस्मात् विविधवृत्तविस्तरादस्माकं प्रयोजनीयमपि बहु विषयं वयं लभामहे। एतानि जातकानि सार्द्धपञ्चशतसंख्याकानि द्वाविंशतिभागेषु विभक्तानि। प्राचीनकालेषु वर्त्तन्ते स्म बह्वया गाथाः। ता एव समाश्रित्य एताः कथा उदाहरणरूपेणासां प्रादुर्बभूवुः। तदेषां गाथानां क्रमवृद्ध्या द्वाविंशतिर्निपाताः संभवन्ति। एत एव विभागा जातकानाम्। जातकत्थवण्णानाकारो जातकं विषयविभागमनुसृत्य पञ्चसु विभागेषु विभक्तवान्। तद्यथा-प्रथमस्तावत् पच्चुप्पन्नवत्थु। एतस्मिन् विभागे भगवतो बुद्धस्यावस्थानकाले वर्तमानानां प्रसङ्गानां व्यासङ्गेन प्रवृत्तानां कथांशानां निर्देशो वर्तते। द्वितीयो विभागः—अतीतवत्थु। एतस्मिन् विभागे जातकस्य प्रधानकथासमुद्देशः। बोधिसत्त्वावस्थायां भगवता बुद्धेनानुभूता वृत्तविशेषा अत्र सङ्गृहीता भवन्ति। तृतीयोंऽशस्तु गाथा भवति। चतुर्थोंऽशो गाथानां व्याख्यानरूपो 'वेय्याकरण' इत्युच्यते। पञ्चमोंऽशः समोधान इत्युच्यते। अत्र भगवता पूर्वेषां वृत्तानां वर्तमानैर्वृत्तैः समवधानं क्रियते।

जातकानां महत्त्वं बहुविधं वरीवर्ति। बौद्धानां कृते तु महत्त्वमेतेषामतीव दयग्राहि। अद्यापि सिंहलब्रह्मादिदेशेषु कथा एतेषां महोत्साहेन श्रूयन्तो समस्तां रात्रिं यावत् उपासकैरुपारुपासिकाभिः। ये नैव सन्ति बौद्धधर्मावलम्बिनस्तेषामपि मानसमुत्साहयति जातकानां जात्यं महत्त्वम्। प्रथमं तावदिदमेव यदत्र प्राचीनतरा मागधी—प्राकृतभाषा लभ्यते। व्यक्तमेवेदं ज्ञायते यद् जातकस्य बहवोंऽशा अशोकशिलालेखेषु लभ्यमानाभ्यो भाषाभ्यः प्राचीनतरां भाषामस्मदग्रे समानयन्ति। न खल्वेतावदेव महत्त्वं जातकानाम्। कथाविनविदामपि कौतुकवहान्येतानि जातकानि। बह्वयः कथा अत्रोपलभ्यन्ते याः सर्वदेशेषु सर्वभाषासाहित्येषु च प्रायः पदं केनचिद् रूपेण प्रापन्। अत्र सामाजिकावस्थानां चित्रणमपि बहुविधं बहुरूपेण प्राप्यते। ऐतिहासिकं तथ्यातथ्यमनुवर्ततां विदुषामस्ति महाद् वादानामवकाशः, किन्तु वर्तत एवात्र प्रभूता सामग्री तथाविधा या सर्वथा विश्वासार्हेति मते नैव विद्यते कस्यचिदपि विमतीः। भारतीयस्थापत्यानुशीलने तथा मूर्तिनिर्माणकौशले च ये सम्यगैतिहासिकं याथातथ्यमनुसर्तुं यतन्ते तेषां तु जातकानीमानि महोपकारीणि।

यद्यपि बौद्धधर्मग्रन्थाः संस्कृते पालि भाषायां च समुपनिबद्धाः सन्तिः, तथापि पालिभाषामविज्ञाय यथातथं भगवतो बुद्धस्य प्रादुर्भावप्रभावं नैव परिमातुं पार्यते। तार्किकमतिचमत्कारैश्चमत्कुर्वन्तु मानसान्यस्माकं बौद्धसंस्कृतग्रन्थाः, किन्तु यो विनय इत्युच्यते बौद्धैस्तमधिकृत्य विशुद्धं विज्ञानं पालिग्रन्थेष्वेवोपलभ्यते। बहवः सन्ति पालिग्रन्था दुर्बोधा दुर्लभाश्च। तान् सम्प्रति तज्जन्मभूमौ न कोऽपि प्रायः शक्नोति यथावदनुशीलयितुमध्यापयितुं वा। तेषु जातकान्येव सुलभावबोधानि वर्तन्ते। अत एव पालिग्रन्थार्थजिज्ञासुः प्रायः एतैरेव स्वाध्ययनं प्रारभते। इत्थं पश्यतां विपश्चितां नैवेदमपरोक्षं भविष्यति यदस्ति जातकेषु किमपि विचित्रं महत्त्वम्। एतेषामध्ययनेन भविष्यति महानुपकार इत्यत्र नाऽस्ति सन्देहलेशः। आशास्महे तद्वृत्तसंक्षेपमेतं पठित्वा भविष्यति कियतां हृदि कौतूहलोल्लासः। तेषामुपकारार्थं दीयन्तेऽत्र कतिपयेषां पुस्तकानां नामानि। तानधीत्य ते विषयमेतमशेषमनुशीलयन्तु। संस्कृते हिन्दीभाषायां वा नास्ति कोऽपि समुचितो ग्रन्थ इति खिद्यति नश्चित्तम्। जिज्ञासायामुद्बुद्धायां सोऽपि सुलभो भविष्यतीति जायतेऽस्माकमाशा।

इदं किमपि तद्वृत्तं लिखितं शुद्धबुद्धितः।
भवेद्भगवतः प्रीत्यै सर्वज्ञस्य दयानिधेः॥

कतिपयेषां सहायकग्रन्थाना

सूची

—:o:—

Law, B. C.—History of Pali Literature.

Winternitz, M.—History of Indian Literature, Vol. II.

" —Article on 'Jatak' in the Encyclopaedia of Religion & Ethics.

Jataka—Text and Commentary (अत्थवण्णाना) Edited by V. Fausboll, in 5 Vols.

Jataka.—English Translation, Edited by Cowell, Cambridge University Press.

" बङ्गानुवाद :—ईशागचन्द्रघोषकृतः पञ्चभागेषु प्रकाशितः ।

Ryhs Davids—Buddhist Birth Stories

निदानकथाया अनुवादो भूमिकासमन्वितः) ।

पण्डित विधुशेखरशास्त्री—पालीप्रकाशः (बङ्गला) ।

पण्डित आद्यादत्तठाकुर—पालीप्रबोध (हिन्दी) ।

Ghose M. K.—Pali Transtation and Composition.

जातक कथामाला—श्रीरामचन्द्र वर्माकृत कुछ जातकों का हिन्दी अनुवाद ।

Joshi—A Manual of Pali.

अत्रत्यजातकानां कथासंक्षेपः ।

१. शिशुमारजातकम्–

वानरस्य हृन्मांसे मे दोहदः समुत्पन्न इति भार्यया विज्ञापितः शिशुमारो वानरं स्वपृष्ठमारोप्य कैतवेन जले निमज्जयितुमीहते । किन्तु हृदयानि नः पादपेष्ववलम्बन्ते वानरेण प्रतारितः स तमुदुम्बरमूलं प्रापयति । तत्पृष्ठतः समुत्पत्य वानरो वृक्षाग्रमोहति ।

२. वानरेन्द्रजातकम्–

नद्याः परपारात् प्रतिनिवर्तमानस्य वानरस्य ग्रहणार्थं शिशुमारः पृष्ठिपाषाणो नाम भूत्वा तीरे समवतिष्ठते वानरश्छलेन तं संलाप्य मुखं व्यादाय मां प्रतीच्छेत्युक्त्वा तडिदिव समुत्पत्य तत्पृष्ठे निपत्यापि क्षणात् परपारं प्राप्नोति ।

३. बकजातकम्–

बकः कारुण्यात् मत्स्यान् सरोऽन्यन् नेष्यन्निव नीत्वा नीत्वा तान् निभृतं खादति । कर्कटस्तत्कण्ठमालम्ब्य गच्छन् कूटकपटमस्य विज्ञाय कर्तरिकयेव ग्रीवामस्य कन्तंस्तं मारयति ।

४. सिंहचर्मजातकम्–

सिंहचर्मपरिच्छन्नो गर्दभः ससुखं क्षेत्रेषु शस्यानि खादति । एकदा तं व्याघ्रं मत्वा जना दूरादेव विपुलं कोलाहलं चक्रुः । महान्तमारवमाकर्ण्य गर्दभेन स्वस्वरेणारावि । गर्दभोऽयमिति ज्ञात्वा जनास्तं लगुडमारं मारयित्वा पञ्चत्वमेवानैषिषुः ।

५. राधजातकम्–

ब्राह्मणो गृहीत् प्रोष्यन् पुत्रकौ ! मे ब्राह्मणीमवेक्षेयमिति गृहस्थौ शुकपोतकाववामन्त्र्य प्रस्थितः। गते तस्मिन् ब्राह्मणी यथेच्छमाचरितुमुपाक्रमात्। तयोरेकस्पदन्येन निषिद्धोऽपि तां हितमुपदिशन् तथा प्राणैर्वियुयुजे। तदन्यः समुपागतं ब्राह्मणं सर्वमाख्याय ततो गतः।

६. नृत्यजातकम्–

हंसराजकन्या मयूरं वरं वृणुते स्म। हर्षोत्कर्षेण सर्वं विस्मृत्य तत्रैव नर्तितुमारेभे। हंसराजस्तदालोक्य नाहमीदृशाय स्वकन्यां दास्यामीति निश्चित्य हंसपोतकायैव तामदात्।

७. उलूकजातकम्–

पक्षिणोऽपि कमपि नृपं चिकीर्षव उलूकं वरयामासुः। किन्तु काकस्तद्विरोधमकार्षीत्। ततः प्रभृति काकोलूकीयं वैरं प्रावृतत। पक्षिणः सुवर्णहंसं राजानमकार्षुः।

८. कुरङ्गमृगजातकम्–

मृगः शतपत्रः कच्छपश्चेति त्रयः सुहृदः सुसुखं निवसन्ति स्म। एकदा लुब्धकपाशगृहीतं मृगमालोक्य शतपत्रौ गत्वा यावल्लुब्धकस्य आगमने विघ्नमाचरति तावत् कच्छपस्ततू पाशांश्छिनत्ति। अथ लुब्धक आगत्य कच्छपमादत्तो। मृगो लुब्धकं प्रलोभ्य दूरं नयति मार्गान्तरेणागत्य कच्छपं मोचयति।

९. यवशकुनजातकम्–

सिंहस्य गलेऽस्थिखण्डमलगत्। तं पीडाव्याकुलमालोक्य शकुनो न त्वां खादयिष्यामीति तेन प्रतिश्राव्य तन्मुखे दण्डकं च स्था-

पयित्वा प्राविशत् तदस्थिखण्डं चाकृषत्। अथान्येद्युर्महिषं खादन्तमालोक्य सिंहमपृच्छत् किमपि शकुनः। मम दन्तान्तरगतोऽपि जीवसीत्येव बहु मन्यस्वेति श्रुत्वा शकुनो गाथां गायन्नुड्डीनः।

१०. शशजातकम्–

शशो मर्कटः शृगाल उद्रश्चेति चत्वारि मित्राण्यभूवन्। शशो विधुमालोक्य श्वः उपवसथकाल इति विज्ञाय तेभ्यश्च धर्माचरणमादिदेश। सर्वे यथाशक्ति प्रायतन्त। शक्रः शशस्य धर्मपरीक्षितुमागात्। तदीयमलौकिकत्यागमालोक्य तं बहुशः प्रशंसन् स्वस्थानं गतः।

११. मृतकभक्तजातकम्–

कश्चित् कोविदः श्राद्धं चिकीर्षुः स्वशिष्यान् छागं स्नापयित्वा तत्रानेतुं समादिशत्। स्नातमात्रश्छागो जहासोच्चै रुरोद च। तदनन्तरमेतदुभयकारणं श्रुत्वा स विद्वान् तममुञ्चत्। यावद् ग्रीवां प्रसार्य घासमत्तुं याति तावत् पतत्यशनिः पञ्चत्वं चोपनीयेते स च्छागः।

१२. बावेरुजातकम्–

बावेरुराष्ट्रे पक्षिणो नाभूवन्। देशान्तरागताद वणिजः काकं क्रीत्वा जनास्तमेव बहुमन्यन्ते स्म। स एव वणिक् कालान्तरे मयूरमादाय तत्र गतः। सम्प्रति मयूरमासाद्य ते प्रीततरा बभूवुः। समामते मयूरे समादरः काकस्य समद्रवत्। स स्वोचितमेव पदं तदानी प्रापितः।

१३. बलाहाश्वजातकम्–

श्रीवस्तुवासिन्यो यक्षिण्यश्छलेन भग्नपोतान् वणिजः प्रलोभ्य स्वनगरं गयन्ति स्म, यथावसरं तान् खादन्ति स्म च। एकदा पञ्चशतं

वणिजस्तत्र तथैव प्राप्तास्ताभिस्तथैव प्रलोभ्य नगरं नीता। ज्येष्ठवणिगासां यक्षिणीभावं ज्ञात्वा कतिपयैः सार्द्धं पलायितो बलाहाश्वेन स्वगृहं प्रापितः।

१४. शूर्पारकजातकम्–

शूर्पारको नाम निर्यामकज्येष्ठः प्रहतनेत्रत्वात् स्वकर्म प्रविहाय राज्ञोऽर्घापनीयकर्मणि प्रविष्टः। तत्राद्भुतकौशलं प्रदर्शयतोऽप्यस्य समुचितसमादरो नाऽभूत। स्वस्थानमेव स प्रत्यागमत्। सोऽन्धोऽपि कृतेऽपि प्रत्याख्याने वणिग्भिर्निर्यामककर्मणि न्ययुज्जत। विविधान् समुद्रभागान् गत्वा व्यापारं च विपुलं विधाय निर्विघ्नः स्वदेशमुपागतम्।

१५. शीलानिशंसजातकम्–

एकदा कश्चिदार्यश्रावको नापितखुटुम्बेन सार्द्धं नावमभ्यरोहत्। सप्तमे दिवसे नौः समुद्रमध्ये भिन्ना। शीलादिसद्गुणोपपन्नत्वात् स उपासको देवतया रक्षित :। तस्य प्रार्थनया नापितोऽपि रक्षितः।

१६. चर्मशाटकजातकम्–

कोऽपि चर्मशाटकः परिव्राट युध्यन्तमेवापक्रामन्तं मेषमेकं दृष्ट्वा अयं मम गुणान् जानाति सन्मानं च करोतीति स्थितोऽचिन्तयत्। एतस्मिन्नेवावरे स मेषः सहसोपसृत्य तथा तं प्रहृतवान् तथाऽयं धरण्यां विगतासुः पपात्।

१७. उत्सङ्गजातकम्–

कस्याश्चित स्त्रियः पतिः पुत्रो भ्राता च राजपुरुषैर्गृहीताः। राज्ञा पृष्टा सा योषित् स्वभ्रातुरेव मुक्तये प्रार्थितवती। सहोदरो भ्राता सुदुर्लभ इति सत्यं परिज्ञाय राजा प्रीतः सन् त्रीगपि बन्धनान् मुमोच।

१८. वैदर्भजातकम्—

आचार्यः सशिष्यो विपिने गच्छन् दस्युभिर्गृहीतः। धनमानीय स्वाचार्यं मोचयेति शिष्यस्तैः प्रेषितः। गच्छता शिष्येण प्रतिबोधितो भूत्वाऽपि स मन्त्रबलेन रत्नवर्षामकार्षीत्। रत्नलोभोपहताः सर्वेऽपि बभूवुः। शिष्यः परावृत्य दृष्ट्वा च सर्वं रत्नान्याददे। प्राणैर्वियुक्तो गृहमागतो दानादिधर्ममाचरन् सुखं जीवनमयापयत्।

१९. राजाववादजातकम्—

कोऽपि राजा निजावगुणानवगन्तुं स्थानात् स्थानान्तरं परिबभ्राम। स हिमवत्प्रदेशं प्राप्य बोधिसत्त्वाश्रमं प्राविवेश। तेन दत्तानि फलानि च बुभुजे। कस्मादिमानि सुमधुराणीत्युक्तो बोधिसत्त्वः प्राह—राजा यदा धार्मिको भवति तदा सर्वमेनैवं भवति। राजा प्रत्यागत्य स्वराज्यं धर्माचरणमारेभे। पुनस्तदाश्रमं गतो फलानि न तथा मधुराणि समुपलेभे। कारणं पृच्छंस्तेनोक्तः—राजा यदा स्वधर्मं यथावन्नावेक्षते तदा फलानि विस्वादूनि भवन्ति। राजा तं प्रणिपत्य गतः स्वदेशे यथावद् धर्मेण पालयामास पृथिवीम्।

२०. मखादेवजातकम्—

मखादेवो नाम राजा बभूव। स नापितेन विज्ञापितो देव! तवैकः केशः श्वेतीभूत इति महान्तं वैराग्यमापन्नः। स्वसुताय राज्यं प्रदाय प्रव्रज्यां जग्राह। चिरं तपांसि तप्त्वा स प्राप स्वपुण्यार्जितं ब्रह्मलोकम्।

नमो तस्स भगवतो अरहतो सम्मासंबुद्धस्स
नमस्तस्मै भगवते अर्हते सम्यक्संबुद्धाय

पालिजातकावलिः

(१) शिशुमारजातकम्

[इदं शास्ता[1] जैत्रवने विहरन् देवदत्तस्य वधाय परिशकन[2] मारभ्या-[3] ऽचकथत्। तदा हि शास्ता 'देवदत्तो वधाय परिशक्यति' इति श्रुत्वा 'न भिक्षवः ! इदानिमेव देवदत्तो मम वधाय परिशक्यति, पूर्वमपि परिशक्यत्येव। सन्त्रासमात्रमपि पुनः कर्तुं नाऽशकत्' इत्युक्त्वाऽतीतमाहार्षीत्।]

अतीते वाराणस्यां ब्रह्मदत्ते राज्यं कुर्वति हिमवत्प्रदेशे बोधिसत्वः कपियोन्यां निर्वृत्य नागबलः स्थामसम्पन्नो महाशरीरः सौभाग्यप्राप्तो भूत्वा गङ्गानिवर्तने अरण्यायतने वासमचिक्लिपत्। तदा गङ्गायामेकः शिशुमारोऽवात्सीत्। अथाऽस्य भार्या बोधिसत्वस्य शरीरं दृष्ट्वा तस्य हृदयमांसे दोहदमुत्पाद्य शिशुमारमाह—'अहं स्वामिन्! एतस्य कपिराजस्य हृदयमांसं खादितुकामा' इति। भद्रे ! वयं जलगोचराः, एष स्थलगोचरः किमपि तं ग्रहीतुं शक्ष्यामः ?' इति। 'येन केनोपायेन गृहाण, चेन्न लप्स्ये मरिष्यामि' इति। 'तेन मा भैषीः, अस्त्येक उपायः इति खादयिष्यामि त्वां तस्य हृदयमांसम्' इति शिशुमारीं समाश्वास्य बोधिसत्त्वस्य गङ्गायाः पानीयं पीत्वा गङ्गातीरे निषण्णकाले अन्तिकं गत्वा एवमाह—'वानरेन्द्र ! अस्मिन् प्रदेशे कष्टफलानि खादन् किं त्वं चीर्णस्थान एव चरसि। पारगङ्गायां आम्रलकुचादीनां मधुरफलानां अन्तो नास्ति, किं ते तत्र गत्वा फलाफलं खादितुं न वर्तते' इति। कुम्भीलराज ! गङ्गा महोदका विस्तीर्णा, कथं तत्र गमिष्यामि' इति। 'चेत् गच्छसि अहं त्वां मम पृष्ठमारोप्य नेष्यामि' इति। स तं श्रद्धाय साध्विति

---

१ 'शाशु अनुशिष्टौ' इत्यस्मात् 'तृन्-तृचौ शंशिक्षदादिभ्यः संज्ञायां चानिटौ' इत्यौणादिकसूत्रेण तृन् तृच् वा। 'शास्ता समन्तभद्रे ना, शासके पुनरन्यवत्' इति मेदिनी च। शास्ता बुद्धः। २ 'शक मर्षणे' इत्यस्मादिदमवगन्तव्यन्। ३ आलम्ब्य, उद्दिश्येत्यर्थः।

१–संसुमार-जातकं

[इदं सत्था जेतवने विहरन्तो देवदत्तस्स वधाय परिसक्कनं आरब्भ कथेसि। तदा हि सत्था 'देवदत्तो वधाय परिसक्कती' ति सुत्वा 'न भिक्खवे इदानेव देवदत्तो मय्हं वधाय परिसक्कति, पुब्बेति परिसक्कति येप। सन्तासमत्तम्पि तन कातुं न सक्खी'ति वत्वा अतीतं आहरि।]

अतीते वाराणसियं ब्रह्मदत्ते रज्जं कारेन्ते हिमवन्तपदेसे बोधिसत्तो कपियोनियं निब्बत्तित्वा नागबालो थामसम्पन्नो महासरीरो सोभग्गप्पत्तो हुत्वा गङ्गानिवत्तने अरञ्ञायतने वासं वासं कप्पेसि। तदा गङ्गाय एको संसुमारी वसि। अथस्स भारिया बोधिसत्तस्स सरीरं दिस्वा तस्स हृदयसंसे दोहळं उप्पादेत्वा संसुमारं आह—'अहं सामि, एतस्स कपिराजस्स हदयमंसं खादितुकामा'ति। 'भद्दे, मयं जलगोचरा, एस थलगोचरो, किन्ति तं गण्हितुं सक्खिस्सामा'ति ? 'येन केन उपायेन गण्ह, सचे न लभिस्सामि मरिस्सामो'ति। तेन हि मा भायि, अत्थेका उपायोति खादापेस्सामि तं तस्स हदयसंस'न्ति संसुमारिं समस्सासेत्वा बोधिसत्तस्स गङ्गाय पानीयं पिवित्वा गङ्गातीरे निसिन्नकाले सन्तिकं गन्त्वा एवमाह—'बानरिन्द, इमस्मि पदेसे कसटफलानि खादन्तो किं त्वं चिण्णट्ठाने येव चरसि, पारगङ्गाय अम्बलबुचादीनं मधुरफलानं अन्तो नत्थि, किं ते तत्थ गन्त्वा फलाफलं खादितुं न वट्टती'ति।' 'कुम्भीलराज, गङ्गा महोदिका वित्तिण्णा, कथं तत्थ गमिस्सामी'ति।' 'सचे गच्छसि अहं तं मम पिट्ठिं आरोपेत्वा नेस्सामी'ति। सो तं सद्दहित्वा 'साधू'ति

संप्रतोष्य तेन हि एहि पृष्ठं मे अभिरोह' इति चाक्ते तमभ्यरुक्षत्। शिशुमारस्ताकं नीत्वा उदकं अवासीषदत्। बोधिसत्त्वः सौम्य! उदके मामवसादयसि, किं नु खलु एतत्' इत्याह। 'नाहं त्वां धर्मे सुधर्मतया, गृहीत्वा गच्छामि, भार्यायाः पुनर्मे तव हृदयमांसे दोहद उत्पन्नः, तामहं तव हृदयं खादितुकाम' इति। 'सौम्य! कथयता त्वया सुन्तरं कृतं, चेत् हि अस्माकं उदरे हृदयं भवेत् शाखाग्रेषु चरतां चूर्णविचूर्णं भवेत्' इति। 'कुत्र पुनः यूयं स्थापयथ' इति बोधिसत्त्वः अविदूरे एकमुदुम्बरं पक्वफलपिण्डिसम्पन्नं दर्शयन् 'पश्यैतानि अस्माकं हृदया न एकस्मिन् उदुम्बरे अवलम्बन्ते इति। 'चेन्मे हृदयं दास्यसि अहं त्वां न मारयिष्यामि' इति। तेन हि 'अत्र नय मां अहं ते वृक्षे अवलम्बमानं दास्यामि' इति। स तमादाय तत्रागमत्। बोधिसत्त्वस्तस्य पृष्ठत उत्पस्य उदुम्बरवृक्षे निषद्य 'सौम्य बाल शिशुमार! एतेषां सत्त्वानां हृदयं नाम वृक्षाग्रे भवन्तीति सञ्ज्ञी अभूः! बालोऽसि, अहं त्वामवावञ्चे। तव फलाफलं तवैव भवतु। शरीरमेव पुनस्ते महत्, प्रज्ञा पुनर्नास्ति' इत्युक्त्वा इममर्थं प्रकाशयन् इमे गाथे अवोचत्—

अलमेतैराम्रैः जम्बुभिः पनसैश्च।
यानि पारं समुद्रस्य वरं मम उदुम्बरः॥
महती बत ते काया[1] न च प्रज्ञा तद्रूपिका।
शिशुमार! वञ्चितोऽसि गच्छेदानीं यथासुखम्॥ इति

शिशुमारः सहस्रं पराजित इव दुःखी दुर्मना प्रध्यायन् आत्मनो निवासस्थानमेव गतः।

[शास्तेदं देशनमाहृत्य जातकं समवादीधपत्— 'तदा शिशुमारो देवदत्तोऽभूत्। शिशुमारी चिञ्चामाणविका, कपिराजः पुनरहमेव' इति।

इति शिशुमारजातकम्।

---

१. 'बोन्दि' इति शरीरवाची देशी शब्दः। बुध्नशब्दसंबद्ध इति केचित्।

सम्पटिच्छित्वा—'तेन हि 'एहि, पिट्ठि मे अभिरुहा'ति च वुत्ते तं अभिरुहि। सुसुमारो थोकं नेत्वा उदके ओसीदापेसि। बोधिसत्तो 'सम्म, उदके मं ओसीदापेसि, किन्तु खो एतंन्ति आह। 'नाहं तं धम्मे सुधम्मताय गहेत्वा गच्छामि, भरियाय पन मे तव हदयमंसे दोहलो उप्पन्नो, तं अहं तव हदयं खादापेतुगामो'ति।' सम्म, कथेन्तेन ते सुन्दरं कतं, सते हि अम्हाकं उदरे हदयं भवेय्य साखग्गेसु चरन्तानं चुण्णविचुण्णं भवेय्या'ति। 'कहं पन तुम्हें ठपेथा'ति बोधिसत्तो अविदूरे एकं उदुम्बरं पक्कफलपिण्डिसम्पन्नं दस्सेन्तो पस्सेतानि अम्हाकं हदयानि एकस्मिं उदुम्बरे ओलम्बन्ती'ति। 'सचे मे हदयं दस्सासि अहं तं न मारेस्सामी'ति। तेन हि 'एत्थ नेहि मं, अहं ते रुक्खे ओलम्बन्तं दस्सामी'ति। सो तं आदाय तत्थ अगमासि। बोधिसत्तो तस्स पिट्ठितो उप्पतित्वा उदुम्बररुक्खे निसीदित्वा 'सम्म वालसुंसुमार, इमेसं सत्तानं हदयं नाम रुक्खग्गे होतीति सञ्ञी अहोसि, बालोसि, अहं तं वञ्चेसिं, तव फलाफलं तवेव होतु। सरीरमेव पन ते महन्तं, पञ्ञा पन नत्थी'ति वत्वा इममत्थं पकासेन्तो इमा गाथा अवोच—

अलं एतेहि अम्बेहि जम्बूहि पनसेहि च।
यानि पार समुद्दस्स वरं मय्हं उदुम्बरो॥
महती वत ते बोन्दि न च पञ्ञा तदूपिका।
सुंसुमार, वञ्चितोसि गच्छ दानि यथासुख'न्ति॥

सुंसुमारो सहस्सं पराजितो विय दुक्खी दुम्मनो पज्झायन्तो अत्तनो निवेसनट्ठानमेव गतो।

[सत्था इमं देसनं आहरित्वा समोधनेसि— सुंतदा सुमारो देवदत्तो अहोसि, सुंसुमारी चिञ्चामाणविका, कपिराजो पन अहं एवा'ति।]

सुंसुमारजातकं।

(२) वानरेन्द्र-जातकम्

[इदं शास्ता वेणुवने विहरन् देवदत्तस्य वधाय परिशकनमारभ्याऽचकथत्। तस्मिन् हि समये शास्ता 'देवदत्तो वधाय परिशक्यति' इति श्रुत्वा 'न भिक्षवः! इदानीमेव देवदत्तो मम वधाय परिशक्यति, पूर्वमपि परिशक्यत्येव। त्रासमात्रमपि कर्तुं नाशकत्' इत्युक्त्वाऽतीतमाहार्षीत्।]

अतीते वारणस्यां ब्रह्मदत्ते राज्यं कुर्वति बोधिसत्त्वः कपि-योन्यां निर्वृर्त्य बुद्धिमवेत्य अश्वपोतप्रमाणः स्थामसम्पन्नः एकचरो भूत्वा नदीतीरे विहरति। तस्याः पुनर्नद्याः विमध्ये एको द्वीपको नानाप्रकारैः! आम्रपनसादिभिः फलवृक्षैः सम्पन्नः। बोधिसत्त्वो नागबलः स्थामसम्पन्नो नद्यः अवतीरतः उत्पत्य द्वीपकस्य अवरतः नदीमध्ये एकः पृष्ठिपाषाणः अस्ति तस्मिन् निपतति ततः उत्पत्य तस्मिन् द्वीपके पतति। तत्र नानाप्रकाराणि फलानि खादित्वा साय तेनैवोपायेन प्रत्यागत्य आत्मनो वसनस्थाने उषित्वा पुनर्दिवसेऽपि तथैव करोति। अमुना नियमेन तत्र वासं कल्पयति। तस्मिन् पुनः काले एकः कुम्भीलः सप्रजापतिकः तस्यां नद्यां वसति। सा भार्या बोधिसत्त्वं अपरापरं गच्छन्तं दृष्ट्वा बोधिसत्त्वस्य हृदयांसे दोहदं उत्पाद्य कुम्भीलमाह—'मम खलु आर्य! अस्य वानरेन्द्रस्य हृदयमांसे दोहद उत्पन्नः' इति। कुम्भीलः 'साधु भवति! लप्स्यसे' इत्युक्त्वा 'अद्य तं सायं द्वीपकतः आगच्छन्तमेव ग्रहीष्यामि' इति गत्वा पृष्ठिपाषाणे न्यपप्तत्। बोधिसत्त्वो दिवसं चरित्वा सायाह्नसमये द्वीपस्थित एव पाषाण-मवलोक्य 'अयं पाषाणः इदानीं उच्चतरः ख्यायते, किन्तु कारणम्' इति अचिन्तत्। तस्य किल उदकप्रमाणं च पाषाणप्रमाणं च सुव्यवस्थापितमेव। तेनास्य एतदभूत—अद्य अस्य नद्या उदकं नैव हीयते न वर्धते, अथ च पुनरयं पाषाणो महान् भूत्वा प्रज्ञा-यते, कच्चिन्नु खलु अत्र मम ग्रहणार्थाय कुम्भीलो निपन्नः, इति।

२—वानरिन्दजातकं

[इदं सत्था वेलुवने विहरन्तो देवदत्तस्स वधाय परिसक्कनं आरब्भ कथेसि। तस्मिं हि समये सत्था 'देवदत्तो वधाय परिसक्कती'ति सुत्वा न भिक्खवे इदानेव देवदत्तो मय्हं वधाय परिसक्कति, पुब्बेति परिसक्कति येव, तासमत्तम्पि कातुं न सक्खी' ति वत्वा अतीतं आहरि।]

अतीते वाराणसियं ब्रह्मदत्ते रज्जं कारेन्ते बोधिसत्तो कपि-योनियं निब्बत्तित्वा वुद्धिं अन्वाय अस्सपोतप्पमाणो थामसम्पन्नो एकचरो हुत्वा नदीतीरे विहरति। तस्सा पन नदिया वेमज्झे एको दीपका नानप्पकारेहि अम्बपनसादीहि फलरुक्खेहि सम्पन्नो। बोधिसत्तो नागबलो थामसम्पन्नो नदिया ओरिमतीरतो उप्पतित्वा दीपकस्स ओरता नदीमज्झे एको पिट्ठिपासाणो अत्थि तस्मिं निपतति, ततो उप्पतित्वा तस्मिं दीपके पतति। तत्थ नानप्प-कारानि फलानि खादित्वा सायं तेनेव उपायेन पच्चागन्त्वा अत्तनो वसनट्ठाने वसित्वा पुनदिवसेपि तथेव करोति। इमिना नियामेन तत्थ वासं कप्पेति तस्मिं पन काले एको कुम्भीलो सपजापतिको तस्सा नदिया वसति। तस्स सा भरिया बोधिसत्तं अपरापरं गच्छन्तं दिस्वा बोधिसत्तस्स हदयमंसे दोहलं उप्पादेत्वा कुम्भीलं आह— 'मय्हं खो अय्य, इमस्स वानरिन्दस्स हदयमंसे दोहलो उप्पन्ना'ति कुम्भीलो 'साधु भोति, लच्छसीति वत्वा 'अज्ज तं सायं दीपकतो आगच्छन्तमेव गण्हिस्सामी'ति गन्त्वा पिट्ठिपासाणे निपज्जि। बोधिसत्तो दिवसं चरित्वा सायण्हसमये दीपके ठितो'व पासाणं ओलोकेत्वा 'अयं पासाणो इदानि उच्चतरो खायति, किन्तु कारण'न्ति चिन्तेसि। तस्स किर उदकप्पमाणं च पासाणप्पमाणं च सुव-वत्थापितमेव होति। तेनस्स एतदहोसि—'अज्ज इमिस्सा नदिया उदकं नेव हायति न वड्ढति, अथ च पनायं पासाणो महा हुत्वा पञ्ञा-यति, कच्चि नु खो एत्थ मय्हं गहणत्थाय कुम्भीलो निपन्नो'ति।

स विमृशामि तावदेयम्' इति तत्रैव स्थित्वा पाषाणेन सार्द्धं कथयन्निव 'भो पाषाण !' इत्युक्त्वा प्रतिवचनं अलभमानः यावत्तृतीयं 'पाषाण' इत्याह 'पाषाण किं प्रतिवचनं न ददासि' इ त पुनरापि तं वानरः 'किं भोः पाषाण अद्य मह्यं प्रतिवचनं न ददासि' इत्याह। कुम्भीलो 'अद्धा अन्येषु दिवसेषु अय पाषाणो वानरेन्द्रस्य प्रतिवचनं अदात्, दास्यामि इदानीं अस्य प्रतिवचनम्' इति चिन्तयित्वा 'किं भो वानरेन्द्र', इत्याह। 'कोऽसि त्वं' इति। 'अहं कुम्भीलः' इति। 'किमर्थं अत्र निपन्नोसि' इति 'तव हृदयमांसं प्रार्थयमानः' इति। बोधिसत्त्वः अचिचिन्तत् 'अन्यो मे गमनमार्गो नास्ति, अद्य मया एष कुम्भीलो वञ्चयितव्यः' इति। अथैनमेवमाह—'सौम्य कुम्भील ! अहमात्मान ते परित्यक्ष्यामि, त्वं मुखं विभृत्य मां तवान्तिकं आगतकाले गृहाण' इति। कुम्भीलानां हि मुखे विवृते अक्षिणी निमीलतः। स तत् कारणं असंलक्ष्य मुखं व्यावारीत्। अथास्य अक्षिणी व्यधायिषाताम्। स मुखं विवृत्य अक्षिणी निमील्य न्यपीपदत्। बोधिसत्त्वः तथाभावं ज्ञात्वा द्वीपकादुत्पतितो गत्वा कुम्भीलस्य मस्तकमाक्रम्य तत उत्पतितो विद्युल्लतेव विद्योतमानः परतीरे अस्थात्। कुम्भीलतस्तदाश्चर्यं दृष्ट्वा 'अनेन वानरेन्द्रेण अत्याश्चर्यं कृतम्' इति चिन्ततयित्वा 'भो वानरेन्द्र ! अस्मिन् लोके चतुर्भिर्धर्मैः समान्वागतः पुरुषः प्रत्यमित्राणि अभिभवति। ते सर्वेऽपि तवाभ्यन्तरे सन्ति मन्ये' इत्युक्त्वा इमां गाथामाह—

यस्यैते चत्वारो धर्माः वानरेन्द्र ! यथा तव।
सत्यं धर्मो धृतिस्त्यागः दृष्टं सोऽतिवर्तते ॥ इति।

एवं कुम्भीलो बोधिसत्त्वं प्रशस्य आत्मनो वासस्थानं गतः।

[शास्ता'न भिक्षवः ! देवदत्त इदानीनेव मम वधाय परिशक्यति; पूर्वमपि पर्यशक्यत्येव' इतीदं धर्मादेशनमाहृत्य अनुसन्धि ग्राहयित्वा जातकं समवादीधपत्। 'तदा कुम्भीलो देवदत्तोऽभूत्, भार्याऽस्य चिञ्चामाणविका, वानरेन्द्रः पुनरहमेव' इति।]

इति वानरेन्द्रजातकं।

सो वीमंसापि ताव नन्ति तत्थेव ठत्वा पासाणेन सद्धिं कथेन्तो विय 'भो पासाण'ति वत्वा पटिवचनं अलभन्तो यावततियं 'पासाणा'ति आह। 'पासाणो कि पटिवचनं न दस्सती'ति। पुनपि नं वानरो 'किं भो पासाण, अज्ज मय्हं पटिवचनं न देसी'ति आह। कुम्भीलो 'अद्धा अञ्ञेसु दिवसेसु अयं पासाणो वानरिन्दस्स पटिवचनं अदासि' दस्सामि दानिस्स पटिवचनन्ति चिन्तेत्वा 'किं भो वानरिन्दा'ति आह। 'को सि त्वं'ति। अहं कुम्भीलो'ति। किमत्थं एत्थ निपन्नोसी'ति। 'तव हृदयमसं पत्थयमानो'ति। बोधिसत्तो चिन्तेसि। 'अञ्ञो मे गमनमग्गो नत्थि, अज्ज मया एस कुम्भीलो वञ्चेतब्बो'ति। अथ नं एवमाह—'सम्म कुम्भील, अहं अत्तानं तुय्हं परिच्चजिस्सामि, त्वं मुखं विवरित्वामं तव सन्तिकं आगतकाले गण्हाही'ति कुम्भीलानं हि मुखविवटे अक्खीनि निमीलन्ति। सो तं कारणं असल्लक्खेत्वा मुखं विवरि। अथस्स अक्खीनि पिथीयिंसु। सो मुखं विवरित्वा अक्खीनि निमीलेत्वा निपज्जि। बोधिसत्तो तथाभाव ञत्वा दीपिका उप्पतितो गन्त्वा कुम्भीलस्स मत्थकं अक्कमित्वा ततो उप्पतितो विज्जुल्लता विय विज्जोतमानो परतीरे अट्ठासि। कुम्भीलो तं अच्छरियं दिस्वा 'इमिना वानरिन्देन अतिअच्छेरकं कत'न्ति चिन्तेत्वा 'भो वानरिन्द, इमस्मिं लोके चतूहि धम्मेहि समन्नागतो पुग्गलो पच्चामित्ते अभिभवति, ते सब्बेपि तुय्हं अब्भन्तरे अत्थि मञ्ञे'ति वत्वा इमं गाथमाह—

यस्सेते चतुरो धम्मा वानरिन्द ! यथा तव।
सच्चं धम्मो धिती चागो दिट्ठ सो अतिवत्ततीति॥

एवं कुम्भीलो बोधिसत्तं पसंसित्वा अत्तनो वसनट्ठानं गतो।

[सत्था 'नभिक्खवेदेवदत्तोइदानेवमय्हं वधायपरिसक्कति, पुब्बेपि परिसक्कतियेवा'ति इमं धम्मदेसनं आहरित्वाअनुसंधिघटेत्वाजातकं समोधानेसि। 'तदा कुम्भीलो देवदत्तोअहोसि, भरियास्स चिञ्चामाणविका, वानरिन्दोपन अहमेवा'ति। वानरिन्दजातकं

(३) बक-जातकम् ।

[इदं शास्ता जैत्रवने विरहन् चीवरवद्धकं भित्तुमारम्याऽचकथत्''' शास्ता 'न भिक्षवः ! जैत्रवनवासिचीवरवद्धक इदानीमेवैष अन्यान् वञ्चयते, पूर्वमपि वञ्चयते एव । ग्रामवासिकेनाऽपि इदानीमेवैष जैत्रवनवासिचीवरवद्धको वञ्चतः पूर्वमपि वञ्चित एव' इत्यक्त्वाऽतीतमाहार्षीत् ।]

अतीते एकस्मिन् अरण्यायतने बोधिसत्वोऽन्यतरं पद्मसरो निःश्रित्य स्थिते वृत्ते वृक्षदेवता भूत्वा न्यवृतत् । तदा अन्यतरस्मिन् नातिमहति सरसि निदाघसमये उदकं मन्दमभूत् । बहवश्चात्र मत्स्या अभूवन् । अत्रैको बकः तान् मत्स्यान् दृष्ट्वा 'एकेनोपायेन इमान् मत्स्यान् वञ्चयित्वा खादिष्यामि' इति गत्वा उदकपर्यन्ते चिन्तयन् न्यसदत् । अथ तं मत्स्या दृष्ट्वा 'किमार्य ! चिन्तयन् निषण्णोऽसि' इति अप्राक्षुः । 'युष्माकं चिन्तयन् निषण्णोऽस्मि' इति । 'अस्माकं किं चिन्तयसि आर्य अस्मिन् सरसि उदकं प्ररिक्तम्, गोचरश्च मन्दो, निदाघश्च महान्, इदानीं मे मत्स्याः किं नाम करिष्यन्ति इति । युष्माकं चिन्तयन् निषण्णोऽस्मि' इति । अथ किं कुर्मः आर्य' इति । 'यूयं चेत् मम वचनं कुर्यात्, अहं वः एकैकं मुखतुण्डकेन गृहीत्वा एवं पञ्चवर्णपद्मसंच्छन्नं महासरो नीत्वा विसर्जयेयम्' इति । 'आर्य प्रथमकल्पकतः पृथिव्यां मत्स्यानां चिन्तनकबको नाम नास्ति, त्वं अस्मासु एकैकं खादितुकामोऽसि' इति । 'नाहं युष्मान् मयि श्रद्दधानान् खादिष्यामि । चेत् पुनः सरसः अस्तिभावं मम न श्रद्दत्थ, एकं मत्स्यं मया सार्धं सरः प्रेषयथ' इति । मत्स्या तस्य श्रद्धाय 'अयं जलेऽपि स्थलेऽपि समर्थः' इति । एकं काणमहामत्स्यमदद्दुः 'इमं गृहीत्वा गच्छ' इति । स तं गृहीत्वा नीत्वा सरसि विस्राज्य सर्वं सरो दर्शयित्वा पुनरानीय तेषां मत्स्यानामन्तिके व्यस्राक्षीत् । स तेषां मत्स्यानां सरसः सम्पत्तिमववर्णत् । ते तस्य कथां श्रुत्वा गन्तुकामा भूत्वा 'साधु आर्य अस्मान् गृहीत्वा गच्छ' इति आहुः ।

(३) बक-जातकं ।

[इदं सत्था जेतवने विहरन्तो चीवरवड्ढकं भिक्खुं आरब्भ कथेसि ।... सत्था 'न भिक्खवे, जेतवनवासी चीवरवड्ढको इदानेव एस अञ्ञे वञ्चेति, पुब्बेपि वञ्चेसि येव । न गामवासिकेन पि इदानेव जेतवनवासी चीवरवड्ढको वञ्चितो पुब्बेपि वञ्चितो येवा'ति वत्वा अतीतं आहरि ।]

अतीते एकस्मिं अरञ्ञायतने बोधिसत्तो अञ्ञतरं पदुमसरं निस्साय ठिते रुक्खे रुक्खदेवता हुत्वा निब्बत्ति । तदा अञ्ञतरस्मिं नातिमहन्ते सरे निदाघसमये उदकं मन्दं अहोसि, बहू चेत्थ मच्छा होन्ति । अथेको बको ते मच्छे दिस्वा 'एकेन उपायेन इमे मच्छे वञ्चेत्वा खादिस्सामी'ति गन्त्वा उदकपरियन्ते चिन्तेतो निसीदि । अथ तं मच्छा दिस्वा 'किं अय्य, चिन्तेतो निसिन्नोसी'ति पुच्छिंसु । 'तुम्हाकं चिन्तेतो निसिन्नोम्ही'ति । 'अम्हाकं किं चिन्तेति अय्या'ति । 'इमस्मिं सरे उदकं परित्तं, गोचरो च मन्दो, निदाघो च महन्तो, इदानिमे मच्छा किं नाम करिस्सन्तीति तुम्हाकं चिन्तेतो निसिन्नोम्ही'ति । 'अथ किं करोम अय्या'ति । 'तुम्हे सचे मय्हं वचनं करेय्याथ' अहं वो एकेकं मुखतुण्डकेन गहेत्वा एकं पञ्चवण्णपदुमसञ्छन्नं महासरं नेत्वा विस्सज्जेय्य'न्ति । 'अय्य, पठमकप्पिकतो पट्ठाय मच्छानं चिन्तनकबको नाम नत्थि, त्वं अम्हेसु एकेकं खादितुकामोसी'ति । 'नाहं तुम्हे मय्हं सद्दहन्ते खादिस्सामि, सचे पन सरस्स अत्थिभावं मय्हं न सद्दहथ एकं मच्छं मया सद्धिं सरं परिसतुं पेसेथा'ति । मच्छा तस्स सद्दहित्वा 'अयं जलेपि थलेपि समत्थो'ति एकं काणमहामच्छं अदंसु—'इमं गहेत्वा गच्छथा'ति । सो तं गहेत्वा नेत्वा सरे विस्सज्जेत्वा सब्बं सरं दस्सेत्वा पुन आनेत्वा तेसं मच्छानं सन्तिके विसज्जेसि । सो तेसं मच्छानं सरस्स सम्पत्तिं वण्णेसि । ते तस्स कथं सुत्वा गन्तु-कामा हुत्वा साधु अय्य, अम्हे गण्हित्वा गच्छाही'ति आहंसु

बकः प्रथमं तं काणमहामत्स्यमेव गृहीत्वा सरस्तीरं नीत्वा सरो दर्शयित्वा सरस्तीरे जाते वरणवृक्षे निलीय तं विटपान्तरे प्रक्षिप्य तुण्डेन विध्यन् जीवितक्षयं प्रापय्य मांसं खादित्वा कण्टकान् वृक्षमूले पातयित्वा पुनर्गत्वा 'विसृष्टो मे स मत्स्यः अन्य आगच्छतु' इति। एतेनोपायेन एकैकं गृहीत्वा सर्वमत्स्यकान् खादित्वा पुनरागतो एकमत्स्यमपि नाऽद्दक्षत्। एकः पुनरत्र कर्कटको अवशिष्टः। बकस्तमपि खादितुकामो भूत्वा 'भो कर्कटक! मया सर्वे ते मत्स्याः नीत्वा पद्मसंच्छन्ने महासरसि विसृष्टाः, एहि त्वामपि नेष्यामि' इति 'मां गृहीत्वा गच्छन् कथं ग्रहीष्यति' इति। 'दष्ट्वा ग्रहीष्यामि, इति। 'त्वमेवं गृहीत्वा गच्छन् मां पातयिष्यसि, नाहं त्वया सार्धं गमिष्यामि' इति। 'मा भैषीः अहं त्वां सुगृहीतं गृहीत्वा गमिष्यामि' इति'। कर्कटकोऽचिचिन्तत् 'अस्य मत्स्यान् नीत्वा सरसि विसर्जनं नाम नास्ति। चेत् पुनर्मां सरसि विसृक्ष्यति, इत्येतत् कुशलम्। नो चेत् विसर्ज्यिष्यति, ग्रीवां अस्य छित्वा जीवितं हरिष्यामि' इति। अथैनमेवमाह— 'सौम्य बक! न खलु त्वं सुगृहीतं ग्रहीतुं शक्ष्यसि, अस्माकं पुन— र्ग्रहणं सुग्रहणम्। स चाहं अळेण तव ग्रीवां ग्रहीतुं लप्स्ये, तव ग्रीवां सुगृहीतां कृत्वा त्वया सार्धं गमिष्यामि' इति। स तं वंचितुकाम एष मां इति अजानन्, साध्विति संप्रत्यैपीत्। कर्कटकः आत्मनः अळैः कर्मकारसन्देशेनेव तस्य ग्रीवां सुगृहीतां कृत्वा 'इदानीं गच्छ' इत्याह। स तं नीत्वा सरो दर्शयित्वा वरणवृक्षाभिमुखं प्रायासीत्। कर्कटकः आह—'मातुल, इदं सरः अत्र, त्वं पुनः इतो नयसि' इति। बकः 'प्रिय मातुलक! अतिभागिनिपुत्रोऽसि मे त्वं' इत्युक्त्वा 'त्वमेष मां उत्क्षित्य विचरन् मम दासः इति संज्ञां करोषि मन्ये। पश्यैतं वरणवृक्षमूले कण्टकराशिं यथा मया ते सर्वे मत्स्याः खादिताः त्वामपि तथैव खादिष्यामि' इत्याह। कर्कटकः 'एते मत्स्याः आत्मनो बालतया त्वया खादिताः। अहं पुनस्ते मां खादितुं

वको पठमं तं काणमहामच्छमेव गहेत्वा सरतीरं नेत्वा सरं दस्सेत्वा सरतीरे जाते वरणरुक्खे निलीयित्वा तं विटपन्तरे पक्खिपित्वा तुण्डेन विज्झन्तो जीवितक्खयं पापेत्वा मंसं खादित्वा कण्टके रुक्खमूले, पातेत्वा पुन गन्त्वा विस्सट्ठो मे सो मच्छो, अञ्ञो आगच्छतू'ति । एतेनुपायेन एकेकं गहेत्वा सब्बमच्छके खादित्वा पुन आगता एकमच्छम्पि नाद्दस। एको पनेत्थ कक्कटको अवसिट्ठो। वको तम्पि खादितुकामो हुत्वा 'भो कक्कटक, मया सब्बे ते मच्छा नेत्वा पदुमसञ्छन्ने महासरे विस्सज्जिता, एहि तम्पि तेस्सामी'ति। 'मं गहेत्वा गच्छन्तो कथं गण्हिस्ससी'ति 'डसित्वा गण्हिस्सामी'ति। 'त्वं एवं गहेत्वा गच्छन्तो मं पातेस्ससि, नाहं तया सद्धिं गमिस्सामी'ति । 'मा भायि अहं तं सुगहितं गहेत्वा गमिस्सामी'ति। कक्कटको चिन्तेसि—'इमस्स मच्छे नेत्वा सरे विसज्जनं नाम नत्थि। सचे पन मं सरे विस्सज्जेस्सति इच्चेतं कुशल, नो चे विस्सज्जेस्सति, गीवं अस्स छिन्दित्वा जीवितं हरिस्सामी'ति। अथ नं एवं आह— 'सम्म वक, न खा त्वं सुगहितं गहेतुं सक्खिस्ससि, अम्हाकं पन गहणं सुगहणं, सचाहं अळेन तव गीवं गहेतुं लभिस्सामि, तव गीवं सुगहितं कत्वा तथा सद्धिं गमिस्सामी'ति । सो तं 'वञ्चेतुकामो एस म'न्ति अजानन्तो 'साधू'ति सम्पटिच्छि । कक्कटको अत्तनो अळेहि कम्मारसण्डासेन विय तस्य गीवं सुगहितं कत्वा 'इदानि गच्छा'ति आह । सो तं नेत्वा सरं दस्सेत्वा वरुणरुक्खाभिमुखो पायासि। कक्कटको आह–'मातुल, अयं सरो एत्ता, त्वं पन इतो नेसी'ति । वको पियमातुलको अतिभगिनिपुत्तोसि मे त्व'न्ति वत्वा 'त्वं एस मं उक्खिपित्वा विचरन्तो मय्हं दासो'ति सञ्ञं करोसि मञ्ञे, पस्सेतं वरणरुक्खमूले कण्टकरासिं, यथा मे ते सब्बमच्छा खादिता तम्पि तथेव खामिस्सामी'ति आह । कक्कटको 'एते मच्छा अत्तनो वालताय तया खादिता, अहं पन ते मं खादितुं

न दास्यामि। त्वामेव पुनः विनाशं प्रापयिष्यामि। त्वं हि बालतया मम वञ्चितभावं न जानासि, म्रियमाणौ उभौ अपि मरिष्यावः। एष ते शीर्षं छित्वा भूम्यां क्षेप्स्यामि' इत्युक्त्वा संदंशेन अळैः तस्य ग्रीवां न्यपिपीडत्। स वृत्तकृतेन मुखेन अक्षिभ्यां अश्रुणा प्रक्षरता मरणभयतर्जितः 'स्वामिन् अहं न खादिष्यामि, जीवितं मे देहि' इत्याह। 'यद्येवं अवतार्य सरसि मां विसृज' इति। स निवृत्य सर एव अवतीर्य कर्कटकं सरःपर्यन्ते पङ्कपृष्ठे अतिष्ठिपत्। कर्कटकः कर्तरिकया कुमुदनलं कल्पयन्निव तस्य ग्रीवां कल्पयित्वा उदकं प्राविक्षत्। तदाश्चर्यं दृष्ट्वा वरणवृक्षे अध्यवस्था देवता साधुकारं ददाना वनं उन्नादयमाना मधुरस्वरेण इमां गाथामाह—

नात्यन्तनिकृतिप्रज्ञो निकृत्या सुखमेधते।
आराध्नोति निकृतिप्रज्ञो बको कर्कटकादिव ॥ इति ॥

[शास्ता 'न भिक्षवः! इदानीमेव ग्रामवासिचीवरवद्धकेन एष वञ्चितः। अतीतेऽपि वञ्चित एव'इतीमं धर्मदेशनमाहृत्य, अनुसन्धि घटयित्वा जातकं समवादीधपत्—तदा स जैत्रवनवासिचीवरवद्धकोऽभूत्, कर्कटको ग्रामवासिचीवरवद्धकः, वृक्षदेवता पुनरहमेव'इति।]

इति बकजातकम्।

—:o:—

(४) सिंहचर्मजातकम्।

[इदं शास्ता जैत्रवने विहरन् कोकालिकमारभ्याऽचकथत्। सोऽस्मिन् काले स्वरभङ्गं भणितुकामोऽभूत। शास्ता तां प्रवृत्तिं श्रुत्वाऽतीतमाहार्षीत।]

अतीते वाराणस्यां ब्रह्मदत्ते राज्यं कुर्वति बोधिसत्त्वः कर्षककुले निर्वृत्य वयःप्राप्तः कृषिकर्मणा जीवितमचिक्लिपत्। तस्मिन् काले एको वणिग् गर्दभभारकेन व्यवहारं कुर्वन् विचरति। स

न दस्सामि, तञ्ञेव पन विनासं पापेस्सामि, त्वं हि बालतया मया वञ्चितभावं न जानसि, मारन्ता, उभोपि मारिस्साम। एस ते सीसं छिन्दित्वा भूमियं खिपिस्सामी'ति वत्वा सण्डासेन विय अळेहि तस्स गीवं निप्पीळेसि। सो वत्तकतेन मुखेन अक्खीहि अस्सुना पग्घरन्तेन मरणभयतज्जितो 'सामि अहं तं न खादिस्सामि, जीवितं' मे देही'ति आह। 'यदि एवं ओतरित्वा सरस्मि मे विस्सज्जेही'ति सो निवत्तित्व सरमेव ओतरित्वा कक्कटकं सरपरियन्ते पङ्कपिट्ठे ठपेसि। कक्कटको कत्तरिकाय कुमुदनाळं कप्पेन्तो विय तस्स गीवं कप्पेत्वा उदकं पाविसि। तं अच्छरियं दिस्वा वरणरुक्खे अधिवत्था देवता साधुकारं ददमाना वनं उन्नादयमाना मधुरस्सरेन इमं गाथवाह—

नाच्चन्तनिकतिप्पञ्ञो निकत्या सुखमेधति।
आराधे निकतिप्पञ्ञो बको कक्कटकामिवाति॥

[सत्था 'न भिक्खवेस ! इदानेवे गामवासी चीवरवड्ढकेनेस वञ्चितो, अतीतेपि वञ्चितो येवा'ति इमं धम्मदेसनं आहरित्वा अनुसंधि घटेत्वा जातकं समोधानेसि'तदा सो बको जेतनवासी चीवरवड्ढको अहोसि, कक्कटको गामवासिचीवरवड्ढको, रुक्खदेवता पन अहमेवा'ति।]

बकजातकं।

---

(४) सीहचम्म-जातकं।

[इदम्पि सत्था जेतवने विहरन्तो कोकालिकं आरब्भ कथेसि। सो इमस्मिं काले सरभञ्ञं भणितुकामो अहोसि। सत्था तं पवत्तिं सुत्वा अतीतं आहरि।]

अतीते वाराणसियं ब्रह्मदत्ते रज्जं कारेन्ते बोधिसत्तो कस्सककुले निब्बत्तित्वा वयप्पत्तो कसिकम्मेन जीविकं कप्पेसि। तस्मिं काले एको वाणिजो गद्रभभारकेन वोहारं करोन्तो विचरति। सो

गतागतस्थाने गर्दभस्य पृष्ठतः भाण्डकं अवतार्य गर्दभं सिंहचर्मणा प्रावृत्य शालियवक्षेत्रेषु विसृजति । क्षेत्ररक्षकाः तं दृष्ट्वा सिंह इति संज्ञाय उपसंक्रमितुं न शक्नुवन्ति । अथैकदिवसे स वणिक् एकस्मिन् ग्रामद्वारे निवासं गृहीत्वा प्रातराशं पाचयन् ततो गर्दभं सिंहचर्म प्रावृत्य यवक्षेत्रे व्यस्राक्षीत । क्षेत्ररक्षकाः सिंह इति संज्ञाय तमुपगन्तुमशक्नुवन्तो गेहं गत्वा अरूरुचन्त । सकलग्रामवासिनः आयुधानि गृहीत्वा शङ्खान् धमन्तो भेरीर्वादयन्तः क्षेत्रसमीपं गत्वोदनादिषुः । गर्दभो मरणभयभीतो गर्दभरवमरावीत् । अथास्स गर्दभभावं ज्ञात्वा बोधिसत्त्वः प्रथमां गाथामाह–

नैतत् सिंहस्य नदितं न व्याघ्रस्य न द्वीपिनः !
प्रावृतः सिंहचर्मणा जाल्मो नदति गर्दभः ॥

ग्रामवासिनोऽपि तस्य गर्दभभावं ज्ञात्वा अस्थीनि भञ्जन्तः पोथयित्वा सिंहचर्मादाय अगमन् । अथ स वणिक् आगत्य तं व्यसनप्राप्तं गर्दभं दृष्ट्वा द्वितीयां गाथामाह—

चिरमपि खलु तं खादेत् गर्दभो हरितं यवम् ।
प्रावृतः सिंहचर्मणा रुवन् चं अदूदुषत् ॥

तस्मिन्नेवं वदत्येव गर्दभः तत्रैव अमृत । वणिगपि तं प्रहाय प्राक्रामीत् ।

[शास्तेदं देशनमाहृत्य जातकं यमवादीधपत् । 'तदा गर्दभः कोकालिकोऽभूत । पण्डितकर्षकः पुनरहमेव' इति ।]

इति सिंहचर्मजातकम् ।

गतगतट्ठाने गद्रभस्स पिट्ठितो भण्डिकं ओतारेत्वा गद्रभं सीहचम्मेन पारुपित्वा सालियवखेत्तेसु विस्सज्जेति । खेत्तरक्खका तं दिस्वा सीहोति सञ्ञाय उपसंकमितुं न सक्कोन्ति । अथेकदिवसं सो वाणिजो एकस्मिं गामद्वारे निवासं गहेत्वा पातरासं पचापेन्तो ततो गद्रभं सीहचम्मं पारुपित्वा यवखेत्ते विस्सज्जेसि । खेत्तरक्खका 'सीहो'ति सञ्ञाय तं उपगन्तुं असक्कोन्ता गेहं गन्त्वा आरोचेसुं । सकलगामवासिनो आवुधानि गहेत्वा संखे धमेन्ता भेरियो वादेन्ता खेत्तसमीपं गन्त्वा उन्नादसु । गद्रभो मरणभयभीतो गद्रभरवं रवि । अथस्स गद्रभभावं ञत्वा बोधिसत्तो पठमं गाथमाह—

नेत सीहस्स नदितं न व्यग्घस्स न दीपिनो ।
पारुतो सीहचम्मेन जम्मो नदति गद्रभो'ति ॥

गामवासिनोपि तस्य गद्रभभावं ञत्वा अट्ठीनि भञ्जता पोथेत्वा सीहचम्मं आदाय अगमंसु । अथ सो वाणिजो आगन्त्वा तं व्यसनप्पत्तं गद्रभं दिस्वा, दुतियं गाथमाह—

'चिरम्पि खो तं खादेय्य गद्रभो हरितं यवं ।
पारुतो सीहचम्मेन रवमानो च दूसयी'ति ॥

तस्मिं एवं वदन्ते येव गद्रभो तत्थेव मरि । वाणिजोपि तं पहाय पक्कामि ।

[सत्था इमं देसनं आहरित्वा जातकं समोधानेसि । 'तदा गद्रभो कोकालिको अहोसि । पण्डितकस्सको पन अहमेवा'ति ।]

सीहचम्मजातकं ।

—:०:—

(५) राध-जातकम्।

[इदं शास्ता जैत्रवने विहरन् एकमुत्कण्ठितभिक्षुमारभ्याऽचकथत् । स किल शास्ता'सत्यं किल त्वं भिक्षो ! उत्कण्ठितः' इति पृष्टः'सत्यं भदन्त !' इत्युक्त्वा 'किंकारणात्' इत्युक्ते एकामलङ्कृतां स्त्रियं दृष्ट्वा किलैषा वासना' इत्याह । अथैनं शास्ता'मातृग्रामो नाम भिक्षो ! न शक्यो रक्षितुम् । पूर्वं दौवारिकान् स्थापयित्वा रक्षन्तोऽपि रक्षितुं नाशकन् । किं ते स्त्रिया ? लब्ध्वाऽपि रक्षितुं न शक्या' इत्युक्त्वा अतीतमाहार्षीत् ।]

अतीते वाराणस्यां ब्रह्मदत्ते राज्यं कुर्वति बोधिसत्त्वः शुकयोन्यां न्यवृतत् । राध इति तस्य नाम । कनिष्ठभ्राता पुनरस्य प्रोष्ठपादो नाम । तावुभावपि तरुणकाले एव एको लुब्धको गृहीत्वा वाराणस्यां अन्यतरस्मै ब्राह्मणाय अदात् । ब्राह्मणस्तौ पुत्रस्थाने स्थापयित्वा प्रत्यग्रहीत् । ब्राह्मणस्य पुनः ब्राह्मणी अरक्षिता दुःशीला । स व्यवहारकरणार्थाय गच्छन् तौ शुकपोतकौ आमन्त्र्य 'तात ! अहं व्यवहारकरणार्थाय गच्छामि । काले विकाले वा युवयोः मातुः करणकर्म अवलोकयेथाम्' इति । 'अन्यस्य पुरुषस्य गमनभावं वा आगमनभावं वा जानीयाथाम्' इति । ब्राह्मणीं शुकपोतकौ प्रत्येष्य अगमत् । सा तस्य निष्क्रान्तकालतः प्रस्थाय अनाचारं अचारीत् । रात्रिमपि दिवाऽपि आगच्छतां च गच्छतां च प्रमाणं नास्ति । तत् दृष्ट्वा प्रोष्ठपादो राधमप्राक्षीत् 'ब्राह्मणः इमां ब्राह्मणीं आवाभ्यां निर्याप्य गतः । इयं च पापकर्म करोति, वदाम्येनाम्' इति । राधो 'मां वादीः' इत्याह । स तस्य वचनं अगृहीत्वा 'अम्ब ! किं कारणात् पापकर्म करोषि' इत्याह । सा तं मारयितुकामा भूत्वा 'तात ! त्वं नाम मम पुत्रः । इतः प्रस्थाय न करिष्यामि' । 'एहि तात ! तावत्' इति प्रीयमाणेव एनं प्रकोष्य आगतं गृहीत्वा 'त्वं मां अपवदसि । आत्मनः प्रमाणं न जानासि'इति ग्रीवां गृहीत्वा मारयित्वा उद्घनान्तरेषु

५—राध-जातकं।

[इदं सत्था जेतवने विहरन्तो एकं उक्कण्ठितभिक्खुं आरब्भ कथेसि। सो किर सत्थारा 'सच्चं किर त्वं भिक्खु! उक्कण्ठितो'ति पुट्ठो 'सच्चं भन्ते'ति वत्वा 'किं कारणा'ति वुत्ते 'एकं अलंकतइत्थिं दिस्वा किलेसवसेना'ति आह। अथ नं सत्था 'मातुगामो नाम भिक्खु! न सक्का रक्खितुं। पुब्बे दोवारिके ठपेत्वा रक्खन्तापि रक्खितुं न सक्खिसु। किं ते इत्थिया? लद्धापि रक्खितुं न सक्का'ति वत्वा अतीतं आहरि।

अतीते वाराणसियं ब्रह्मदत्ते रज्जं कारेन्ते बोधिसत्तो सुक-योनियं निब्बति। 'राधो'तिस्स नामं कनिट्ठभाता पनस्स पोट्ठपादो नाम। ते उभोपि तरुणकाले येव एको लुद्दको गाहेत्वा वाराणसियं अञ्ञतरस्स ब्राह्मणस्स अदासि। ब्राह्मणो ते पुत्तट्ठाने ठपेत्वा पटिजग्गि। ब्राह्मणस्स पन ब्राह्मणी अरक्खिता दुस्सीला। सो वोहारकरणत्थाय गच्छन्तो ते सुकपोतके आमन्तेत्वा 'तात, अहं वोहारत्थाय गच्छामि, काले विकाले वा तुम्हाकं मातु करणकम्मं ओलेकेय्याथा'ति। 'अञ्जरस्स पुरिसस्स गमजभावं बा आगमन-भावं वा जानेय्याथा'ति। ब्राह्मणिं सुकपोतके पटिच्छापेत्वा अगमासि। सा तस्स निक्खन्तकालतो पट्ठाय अनाचारं चरि। रत्तिम्पि दिवापि आगच्छन्तानं च गच्छतानं च पमाणं नत्थि। तं दिस्वा पोट्ठपादो राधं पुच्छि—'ब्राह्मणो इमं ब्राह्मणीं अम्हाकं निय्यादेत्वा गतो, अयं, च पापकम्मं करोति, वदामि न'न्ति। राधो 'मा वदी'ति आह। सो तस्स वचनं अगहेत्वा 'अम्म, किं कारणा पापकम्मं करोसी'ति आह। सा तं मारेतुकामा हुत्वा 'तात, त्वं साम मय्हं पुत्तो, इतो पट्ठाय न करिस्सामी'ति 'एहि तात, तावा'ति पियायमाना विय नं पक्कोसित्वा आगतं गहेत्वा 'त्वं मं ओवदसि अत्तनो पमाणं न जानासी'ति गीवं गहेत्वा मारेत्वा उद्धनन्तरेसु

प्राक्षैप्सीत् । ब्राह्मणः आगत्य विश्रम्य बोधिसत्त्वं 'किं तात राध ! माता वां अनाचारं करोति न करोति' इति पृच्छन् प्रथमां गाथामाह—

प्रवासादागतस्तात ! इदानीं न चिरागतः ।
कच्चिन्नु तात ! ते माता नान्यमुपसेवते इति ॥

राधः 'तात ! पण्डितानां भूतमभूतं वा अनिर्यानिकं नामं न कथयन्ति' इति ज्ञापयन् द्वितीयां गाथामाह—

न खलु पुनरेतां शोभनां गिरंसत्योपसंहिताम् ।
श्रयेत् प्रोष्ठपाद इव मुर्मुर उपकूलितः ॥

एवं बोधित्त्वो ब्राह्मणाय धर्मं दिष्ट्वा 'मयापि अस्मिन् स्थाने वसितुं न शक्यम्' इति ब्राह्मणं आपृक्ष्य अरण्यमेव प्राव्रक्षत् ।

[शास्तेद देशनमाहृत्य सत्यानि प्रकाशयित्वा जातकं समवादीधपत्— तदा पोष्ठपाद आनन्दोऽभूत् , राधः पुनरहमेव' इति]

इति राधजातकम् ।

:———:

(६) नृत्यजातकम् ।

[इदं शास्ता जेत्रवने विहरन् एकं बहुभाण्डिकं भिक्षुमारभ्याऽचकथत् ।··· ···शास्ता 'न भिक्षवः ! इदानीमेवैषभिक्षु ह्यापत्रप्याभावेन रत्नशासनात्परिहीनः, पूर्वमपि स्त्रीरत्नप्रतिलाभतोऽपि परिहीन एवं' इत्युक्त्वाऽतीतमाहार्षीत् ।]

अतीते प्रथमकल्पे चतुष्पदाः सिंहं राजानमकार्षुः, मत्स्याः आनन्द-मत्स्यं, शकुनाः सुवर्णहंसम् । तस्य पुनः सुवर्णराजहंसस्य दुहिता हंसपोतिका अभिरूपा अभूत् इति स तस्यै वरमदात् । सा आत्मनो चित्तरुचितं स्वामिकमवारीत् । हंसराजः तस्यै वर दत्वा हिमवति सर्वशकुने संन्यपप्तत् । नानाप्रकाराः हंसमयूरादयः

पक्खिपि। ब्राह्मणो आगन्त्वा विस्समित्वा बोधिसत्तं 'किं तात राध, माता वो अनाचारं करोति, न करोती'ति पुच्छन्तो पठमं गाथमाह--

पवासा आगतो तात ! इदानि च चिरागतो।
कच्चिन्नु तात ! ते माता न अञ्ञं उपसेवती'ति॥

राधो 'तात पण्डिता नाम भूतं वा अभूतं अनिय्यानिकं नाम न कथेन्ती'ति ञापेन्तो दुतियं गाथमाह—

न खो पनेतं सुभणं गिरं सच्चूपसंहितं।
सयेथ पोट्ठपादोव मुम्मुरे उपकूलितो॥

एवं बोधिसत्तो ब्राह्मणस्स धम्मं देसेत्वा 'मयापि इमस्मिं ठाने वसितुं न सक्का'ति ब्राह्मणं आपुच्छित्वा अरञ्ञ एव पाविसि।

[सत्था इमं देसनं आहरित्वा सच्चानि पकासेत्वा जातकं समोधानेसि। 'तदा पोट्ठपादो आनन्दो अहोसि, राधो पन अहमेवा'ति।]

राधजातकं।

:*——*:

६—नच्च-जातकं।

[इदं सत्था जेतवने विहरन्तो एकं बहुभण्डिकं भिक्खुं आरब्भ कथेसि।... ...सत्था न भिक्खवे ! इदानेव एसो भिक्खु हिरोत्तप्पाभावेन रतनसासना परिहीनो, पुब्बे इत्थिरतनपटिलाभतोपि परिहीनो येवा'ति वत्वा अतीतं आहरि।]

अतीते पठमकप्पे चतुप्पदा सीहं राजानं अकंसु, मच्छा आनन्दमच्छं, सकुणा सुवण्णहंसं। तस्स पन सुवण्णराजहंसस्स धीता हंसपोतिका अभिरूपा अहोसी। सो तस्सा वरं अदासि। सा अत्तनो चित्तरुचितं सामिकं वारेसि। हंसराजा तस्सा वरं दत्वा हिमवन्ते सब्बसकुणे सन्निपातापेसि नानप्पकारा हंसमोरादयो

शकुनगणाः समागत्य एकस्मिन् महति पाषाणतले संन्यपतन्। हंसराजः आत्मनः चित्तरुचितं स्वामिकं आगत्य गृह्णातु इति दुहितरं प्राचुक्नुशत् । सा शकुनसङ्घं अवलोकयन्ती मणिवर्णग्रीवं चित्र-प्रेक्षणं मयूरं दृष्ट्वा 'अयं मे स्वामिको भवतु'इत्युरूरुचत। शकुनसंघाः मयूर उपसंक्रम्य अवोचन्। 'सौम्य मयूर ! इयं राजदुहिता एतावतां शकुनानां मध्ये स्वामिकं रोचयन्ती त्वयि रुचिं उदपादि ।' मयूरः 'यद्यपि तावन्मे वलं न पश्यसि' इति अतितुष्ट्या ह्यावत्रप्यं भित्वा तावन्महतः शकुनसंघस्य मध्ये पक्षौ प्रसार्य नर्तितुं आरब्धः । नृत्यन् अप्रतिच्छन्नो अभूत् । सुवर्णहंसराजः लज्जितः 'अस्य नैव अध्यस्तसमुत्थाना ह्रीः अस्ति न बहिर्धा समुत्थानं आपत्रप्यं, नास्य भिन्नह्यापत्रप्यस्य मम दुहितरं दास्यामि' इति शकुनसंघमध्ये इमां गाथामाह—

रुतं मनोज्ञं रुचिरा च पृष्ठिः वैदूर्यवर्णोपनिभा च ग्रीवा।
व्याममत्तानि च प्रेक्षणानि नृत्येन ते दुहितरं नो ददामि ॥

हंसराजः तस्मिन्नेव परिषन्मध्ये आत्मनः भागिनेयहंसपोतकाय दुहितरमदात् । मयूरो हंसपोतिकां अलब्ध्वा लज्जित्वा तत एव उत्थाय पलायिष्ट । हंसराजोऽपि आत्मनो वसनस्थानमेव गतः ।

[शास्ता'न भिक्षवः ! इदानीमेवैष ह्यापत्रप्यं भित्वा रत्नशासनात् परिहीनः, पूर्वं स्त्रीरत्नप्रतिलाभतोऽपि परिहीन एव' इति । इदं धर्मदेशनमाहृत्य, अनुसन्धि पूर्वं स्रींरत्नप्रतिलाभन्तोऽपि परिहीन एव' इति । इदं धर्मदेशनमाहृत्य; अनुसन्धि घटयित्वा जातकं समवादीधपन् । 'तदा मयूरो बहुभण्डिकोऽभूत्, हंसराजः पुन रहमेव' इति ।]

इति नृत्यजातकम्

———

सकुणगणा समागन्त्वा एकस्मिं महति पाषाणतले सन्निपतिंसु। हंसराजा 'अत्तनो चित्तरुचितं सामिकं अगन्त्वा गण्हतू'ति धीतरं पक्कोसापेसि। सा सकुणसंघं ओलोकेन्ती मणिवण्णगीवं चित्रपेक्खुणं मोरं दिस्वा 'अयं मे सामिको होतू'ति रोचेसि। सकुणसंघा मोरं उपसंकमित्वा आहंसु—'सम्म मोर, अयं राजधीता एत्तकानं सकुणानं मज्झे सामिकं रोचेन्तो तयि रुचिं उत्पादेसी'ति। मोरो 'अज्जापि ताव मे बलं न पस्ससी'ति अतितुट्ठिया हिरोत्तप्पं भिन्दित्वा ताव महतो सकुणसंघस्स मज्झे पक्खे पसारेत्वा नच्चितुं आरभि। नच्चतो अप्पटिच्छन्नो अहोसि। सुवण्णहंसराजा लज्जितो 'इमस्स नेव अज्झत्तसमुट्ठाना हिरि अत्थि, न बहिद्धासमुट्ठानं ओत्तप्पं, नास्स भिन्नहिरोत्तप्पस्स मम धीतरं दस्सामी'ति सकुणसंघमज्झे इमं गाथं आह—

रुदं मनुञ्ञं रुचिरा च पिट्ठी वेळुरियण्णवपनिभा च गीवा।
व्याममत्तानि च पेक्खुणानि, नच्चेन ते धीतरं नो ददामीति॥

हंसराजा तस्मिं येव परिसमज्झे अत्तनो भागिनेय्यहंसपोतकस्स धीतरं अदासि। मारो हंसपोतिकं अलभित्वा लज्जित्वा ततोव उट्ठहित्वा पलायि। हसराजापि अत्तनो वसनट्ठानमेव गतो।

[सत्था 'न भिक्खवे! इदानेवेत हिरोत्तप्पं भिन्दित्वा रतनसासना परिहीनो, पुब्बे इत्थिरतनपटिलाभतोपि परिहीनो येवा'ति। इमं धम्मदेसनं आहरित्वा अनुसंधिं घटेत्वा जातकं समोधानेसि। 'तदा मारो बहुभण्डिको अहोसि, हंसराज पन अहमेवा'ति।]

नच्चजातकं।

———

(७) उलूकजातकम् ।

[इदं शास्ता जैत्रवने विहरन् काकोलूककलहमारभ्याऽचकथत् । ·· भिक्षवः 'कदा प्रस्थाय तुनर्भदन्त ! काकानां च उलूकानां च अन्योन्यं वैरमुत्पन्नम्' इत्यप्राक्षिषुः । शास्ता 'प्रथमकल्पीयकालतः प्रस्थाय' इत्युक्त्वाऽतीतमाहार्षीत् ।]

अतीते प्रथमकल्पिकाः सन्निपत्य एकमभिरूपं सौभाग्यप्राप्तं आज्ञासम्पन्नं सर्वाकारपरिपूर्णं पुरुषं गृहीत्वा राजानमकार्षुः । चतुष्पदा अपि सन्निपत्य एकं सिंहं राजानमकार्षुः । महासमुद्रे मत्स्याः आनन्दं नाम मत्स्यं राजानमकार्षुः । ततः शकुनगणाः हिमवत्प्रदेशे एकस्मिन् पृष्ठिपाषाणे सन्निपत्य 'मनुष्येषु राजा प्रज्ञायते तथा चतुष्पदेषु चैव मत्स्येषु च । अस्माकं पुनरन्तरे राजा नाम नास्ति । अपतेः वासो नाम न वर्तते । अस्माकमपि राजानं लब्धुं वर्तते । एकं राजस्थाने स्थापयितव्ययुक्तकं जानीथाः, इति ते तादृशं शकुनमवलोकयमाना एकं उलूकं रोचयित्वा 'अयं नो रोचते' इत्यवोचन् । अथैकः शकुनः सर्वेषां अध्याशयग्रहणार्थं त्रिकृत्वः अशुश्रवत् । तस्य श्रावयतः द्वे श्रावणे अधिवास्य तृतीयश्रावणे एकः काक उत्थाय 'तिष्ठ तावत्, एतस्य अस्मिन् राज्याभिषेककाले एवंरूप मुखं, क्रुद्धस्य कीदृशं भविष्यति' इति । अनेन हि क्रुद्धेन अवलोकिता वयं तप्तकपाले प्रक्षिप्ततिला इव तत्र तत्रैव भेत्स्यामः । इमं राजानं कर्तुं मह्यं न रोचते' इति इममर्थं प्रकाशयितुं प्रथमां गाथामाह—

सर्वैः किल ज्ञातिभिः कौशिकः ईश्वरः कृतः ।
चेत् ज्ञात्यनुज्ञातो भणेय एकवाचिकम् ॥

अथ एनमनुज्ञातत्वात् द्वितीयां गाथामवोचन्—

भण सौम्य ! अनुज्ञातो अर्थं धर्मं च केवलम् ।
सन्ति हि दहराः पक्षिणः प्रज्ञावन्तो द्युतिधरा इति ॥

स एवमनुज्ञातो तृतीयां गाथामाह—

७—उलूक-जातकं

[इदं सत्था जेवतने विहरन्तो काकोलूककलहं आरब्भ कथेसि।...भिक्खू 'कदा पट्ठाय पन भन्ते ! काकानं च उलूकानं च अञ्ञमञ्ञं वेरं उप्पन्न'न्ति ? पुच्छिसु। सत्था 'पठमकप्पियकालतो पट्ठया'ति वत्वा अतीतं आहरि।]

अतीते पठमकप्पिका सन्निपतित्वा एकं अभिरूपं सोभग्गप्पत्तं आणासम्पन्नं सब्बाकारपरिपुण्णं पुरिसं गहेत्वा राजानं करिंसु। चतुप्पदापि सन्निपतित्वा एकं सीहं राजानं करिंसु। महासमुद्दे मच्छा आनन्दं नाम मच्छं राजानं अकंसु। ततो सकुणगण हिमवन्तपदेसे एकस्मिं पिट्ठिपासाणे सन्निपतित्वा 'मनुस्सेसु राजा पञ्ञायति, तथा चतुप्पदेसु चेव मच्छेसु च। अम्हाकं पनन्तरे राजा नाम नत्थि। अप्पतिस्सवासो नाम न वट्ठति। अम्हाकंम्पि राजा नं लद्धुं वट्टति। एकं राजट्ठाने ठपेतब्बयुत्तकं जानाथा'ति ते तादिसं सकुणं ओलोकयमाना एकं उलूकं रोचेत्वा 'अयं नो रुच्चती'ति आहंसु। अथेको सकुणो सब्बेसं अज्झासयगहणत्थं तिक्खत्तुं सावेसि। तस्स सावेन्तस्स द्वे सावना अधिवासेत्वा ततियसावनाय एको काको उट्ठाय 'तिट्ठ ताव, एतस्स इमस्मिं राजाभिसेककाले एवरूपं मुखं, कुद्धस्स किदिसं भविस्सती'ति, इमिना नि कुद्धेन ओलोकिता मयं तत्तकपाले पक्खित्ततिला विय तत्थ तत्थेव भिज्जिस्सास। इमं राजानं कातुं मय्हं न रुच्चती'ति इमं अत्थं पकासेतुं पठमं गाथमाह—

> सब्बेहि किर ञातीहि कोसियो इस्सरो कतो।
> सचे ञातीहनुञ्ञातो भणेय्याहं एकवाचिय'न्ति॥

अथ नं अनुञ्ञातत्ता सकुणा दुतियं गाथमाहंसु—

> भण सम्म ! अनुञ्ञातो अत्थं धम्मञ्च केवलं।
> सन्ति हि दहरा पक्खी पञ्ञावन्ता जुतिन्धरा'ति॥

सो एवं अनुञ्ञातो ततियं गाथमाह—

न मे रोचते भद्रं वः उलूकस्याभिषेचनम् ।
अक्रुद्धस्य मुखं पश्य कथं क्रुद्धो करिष्यति ॥ इति

स एवमुक्त्वा 'मह्यं न रोचते' 'मह्यं न रोचते' इति विरवन् आकाशे उदपतत् । उलूकोऽपि एनमुत्थाय अभान्त्सीत् । ततः प्रस्थाय ते अन्योन्यं वैरं आभान्त्सिषुः । शकुनाः सुवर्णहंसं राजानं कृत्वा प्राक्रामिषुः ।

[शास्तेदं धर्म्मदेशनमाहृत्य सत्यानि प्रकाश्य जातकं समवादीधपत् । 'तदा राज्येऽभिषिक्तहंसपोतकः पुनरहमेवाभूवम्' इति ।]

इत्युलूकजातकम् ।

---

(८) कुरङ्गमृग-जातकम्

[इदं शास्ता वेणुवने विहरन् देवदत्तमारभ्याऽचकथत् । तदा हि शास्ता 'देवदत्तो वधाय परिशक्यति' इति श्रुत्वा 'न भिक्षवः । इदानीमेव देवदत्तो मम वधाय परिशक्यति, पूर्वमपि पर्यशकदेव' इत्युक्त्वाऽतीतमाहार्षीत ।]

अतीते वाराणास्यां ब्रह्मदत्ते राज्यं कुर्वति बोधिसत्त्वः कुरङ्गमृगो भूत्वा अरण्ये एकस्य सरसः अविदूरे एकस्मिन् गुल्मे वासमचिक्लिपत् । तस्यैव सरसः अविदूरे एकस्मिन् वृक्षाग्रे शतपत्रो न्यसदत् । सरसि पुनः कच्छपो वासमचिक्लिपत् । एवं ते त्रयोऽपि सहायाः अन्योन्यं प्रियसंवासं अवात्सुः । अथैको मृगलुब्धकः अरण्ये चरन् पानीयतार्थे बोधिसत्त्वस्य पदचिह्नं दृष्ट्वा लोहनिगडसदृशं वध्रमयं पाशं उड्डाय अगमत् ! बोधिसत्त्वः पानीयं पातुं आगतः प्रथमयामे एव पाशे बद्धो भूत्वा बद्धरावं अरावीत् । तस्य तेन शब्देन वृक्षाग्रतः शतपत्रः उद्गतश्च, कच्छपः आगत्य 'किं नु खलु कर्तव्यम्' इति अममन्त्रन्त । अथ शतपत्रः कच्छपं आमन्त्र्य 'सौम्य ! तव दन्ताः

न मे रुच्चति भद्दं वो उलूकस्साभिसेचनं।
अकुद्धस्स मुखं पस्स, कथं कुद्धो करिस्ती'ति॥

सो एवं वत्वा 'मय्हं न रुच्चति मय्हं न रुच्चती'ति विरवन्तो आकासे उप्पति। उलूकोपि नं उट्ठाय अनुबन्धि। ततो पट्ठाय ते अञ्ञमञ्ञं वेरं बन्धिसु। सकुणा सुवण्णहंसं राजानं कत्वा पक्कमिंसु।

[सत्था इमं धम्मदेसनं आहरित्वा सच्चानि पकासेत्वा जातकं समाधानेसि। 'तदा रज्जे अभिसित्तहंसपोतको पन अहमेव अहोसी'न्ति।]

उलूकजातकं।

८—कुरुङ्गमिगजातकं

[इदं सत्था वेळुवने विहरन्तो देवदत्तं आरब्भ कथेसि। तदा हि सत्था 'देव-दत्तो बधाय परिसक्कती'ति सुत्वा 'न भिक्खवे इदानेव देवदत्तो मय्हं परिसक्कति, पुब्बेपि परिसक्कि येवा'ति वत्वा अतीतं आहरि।]

अतीते बाराणसियं ब्रह्मदत्ते रज्जं कारन्ते बोधिसत्तो कुरुङ्गमिगो हुत्वा अरञ्ञे एकस्स सरस्स अविदूरे एकस्मिं गुम्बे वासं कप्पेसि। तस्सेव सरस्स अविदूरे एकस्मिं रुक्खग्गे सतपत्तो निसीदि। सरस्मिं पन कच्छपो वासं कप्पेसि। एवं ते तयोपि सहाया अञ्ञमञ्ञं पियसंवासं वसिंसु। अथेको मिगलुद्दको अरञ्ञे चरन्तो पानीयतित्थे बोधिसत्तस्स पदवलञ्जं[१] दिस्वा लोहनिगळसदिसं वद्धमयं पासं ओड्डेत्वा अगमासि। बोधिसत्तो पानीयं पातुं आगतो पठमयामे येव पासे बज्झित्वा बद्धरावं रवि। तस्स तेन सद्देन रुक्खग्गतो सत-पत्तो उदकतो च कच्छपो आगन्त्वा 'किन्नु खो कातब्ब'न्ति मन्तयिंसु। अथ सतपत्तो कच्छपं आमन्तेत्वा 'सम्म! तव दन्ता

१. वलञ्जशब्दश्चिह्नार्थवाची देशीत्यवगन्तव्यः।

सन्ति त्वमिमं पाशं छिन्धि । अहं गत्वा यथा स न आगच्छति तथा करिष्यामि । एवं अस्माभ्यां द्वाभ्यामपि कृतपराक्रमेण सहायो नौ जीवितं लप्स्यते' इति इममर्थं प्रकाशयन् प्रथमां गाथामाह—

अङ्ग वध्रमयं पाशं छिन्धि दन्तैः कच्छप !
अहं तथा करिष्यामि यथा नेहैति लुब्धकः ॥ इति

कच्छपः चर्मवरत्रा खादितुं आरब्ध । शतपत्रो लुब्धकस्य वसन ग्रामं गतः । लुब्धः प्रत्यूषकाले एव शक्तिं गृहीत्वा न्यष्क्रामीत । शकुनस्य निष्क्रमणभावं ज्ञात्वा वाशित्वा पक्षौ प्रस्फोट्य तं पुरद्वारेण निष्क्रामन्तं मुखे प्राहरीत् । लुब्धः कालकर्णिशकुनेनास्मि प्रहतः इति निवृत्य स्तोकं शयित्वा पुनः शक्तिं गृहीत्वा उदस्थान् । शकुनः 'अयं प्रथमं पूर्वद्वारेण निष्क्रान्तः, इदानीं पश्चिमद्वारेण निष्क्रमिष्यति'इति ज्ञात्वा गत्वा पश्चिमगेहे न्यसदत् । लुब्धोऽपि 'पुरद्वारेण मया निष्क्रमता कालकर्णिशकुनो दृष्टः । इदानीं पश्चिमद्वारेण निष्क्रमिष्यामि' इति पश्चिचमद्वारेण निरक्रमीत् । शकुनः पुनः वाशित्वा गत्वा मुखे प्राहरीत् । लुब्धः पुनरपि कालकर्णिशकुनेव प्रहतः 'न मे एष निष्क्रमितुं ददाति' इति निवृत्य यावत् अरुणोद्गमनं शयित्वा अरुणवेलायां शक्तिं गृहीत्वा निरक्रमीत् । शकुनो वेगेन गत्वा लुब्धः आगच्छतीति बोधिसत्त्वस्य अचकथत् । तस्मिन क्षणे कच्छपेन एक एव वध्रं स्थापयित्वा शेषवरत्राः खादिता अभूवन् । दन्ताः पुनरस्य पतनाकारप्राप्ता जाताः मुखं लोहितम्रक्षितम् । बोधिसत्त्वः लुब्ध पुत्रं शक्तिं गृहीत्वा अशनिवेगेनागच्छन्तं दृष्ट्वा तं वध्रं छित्वा वनं प्राविक्षत् । शकुनो वृक्षाग्रे न्यसदत् । कच्छपः पुनः दुर्बलत्वात् तत्रैव न्यपादि । लुब्धः कच्छपं प्रसेवके प्रक्षिप्य एकस्मिन् स्थाणुके अलगीत् । बोधिसत्त्वः निवृत्य अवलोकयन् कच्छपस्य गृहीतभावं ज्ञात्वा सहायस्य जीवितदानं दास्यामि इति दुर्बल इव भूत्वा लुब्धकाय आत्मानं अददर्शत । स 'दुर्बल एष भविष्यति, मारयिष्यामि एनम्' इति शक्तिमादाय अन्व-

अस्थि, त्वं इमं पासं छिन्द, अहं गन्त्वा यथा सो नागच्छति तथा करिस्सामि। एवं अम्हेहि द्वीहिपि कतपरक्कमेन सहायो नो जीवितं लभिस्सती'ति इममत्थं पकासेन्तो पठमं गाथमाह—

'इङ्घ वद्धमयं पासं छिन्द दन्तेहि कच्छप।
अहं तथा करिस्सामि यथा नेहिति लुद्दको'ति॥

कच्छपो चम्मवरत्तं खादितुं आरभि। सतपत्तो लुद्दकस्स वसनगामं गतो! लुद्दो पच्चूसकाले येव सत्तिं गहेत्वा निक्खमि। सकुणो तस्स निक्खमनभावं ञत्वा वस्सित्वा पक्खे पप्फोठेत्वा तं पुरेद्वारेन निक्खमन्तं मुखे पहरि। लुद्दो कालकण्णिसकुणेनम्हि पहटोति निवत्तित्वा थोकं सयित्वा पुन सत्तिं गहेत्वा उट्ठासि। सकुणो 'अयं पठमं पुरेद्वारेन निक्खन्तो इदानि पच्छिमद्वारेन निक्खमस्सती'ति ञत्वा गन्त्वा पच्छिमगेहे निसीदि। लुद्दोऽपि 'पुरेद्वारेन मे निक्खमन्तेन कालकण्णिसकुणो दिट्ठो, इदानि पच्छिमद्वारेन निक्खमिस्सामी'ति पच्छिमद्वारेन निक्खमि। सकुणो पुन वस्सित्वा गन्त्वा मुखे पहरि। लुद्दो पुनपि कालकण्णिसकुणेन पहटो 'न मे एस निक्खमितुं देती'ति निवत्तित्वा याव अरुणुग्गमना सयित्वा अरुणवेलाय सत्तिं गहेत्वा निक्खमि। सकुणो वेगेन गन्त्वा 'लुद्दो आगच्छती'ति बोधिसत्तस्स कथेसि। तस्मिं खणे कच्छपेन एकं एव बद्धं ठपेत्वा सेसवरत्ता खादिता होन्ति। दन्ता पनस्स पतनाकारप्पत्ता जाता, मुखं लोहितमक्खितं। बोधिसत्तो लुद्दपुत्तं सत्तिं गहेत्वा असनिवेगेन आगच्छन्तं दिस्वा तं बद्धं छिन्दित्वा वनं पाविसि। सकुणो रुक्खग्गे निसीदि। कच्छपो पन दुब्बलत्ता तत्थेव निपज्जि। लुद्दो कच्छपं पसिब्बके पक्खिपित्वा एकस्मिं खानुके लग्गेसि। बोधिसत्तो निवत्तित्वा आलोकेन्तो कच्छपस्स गहितभावं ञत्वा सहायस्स जीवितदानं दस्सामीति दुब्बलो विय हुत्वा लुद्दस्स अत्तानं दस्सेसि। सो 'दुब्बलो एस भविस्सति, मारेस्सामि नं'न्ति सत्तिं आदाय अनु-

भान्त्सीत् । बोधिसत्त्वः नातिदूरे नात्यासन्ने गच्छन् तमादाय आरण्यं प्राविक्षत् । दूरं गतभावं ज्ञात्वा पदे वञ्चयित्वा अन्येन मार्गेण वातवेगेन गत्वा श्रृङ्गेन प्रसेवकं उत्क्षिप्य भूम्यां पातयित्वा फालयित्वा कच्छपं न्याहारीत् । शतपत्रोऽपि वृक्षात् अवातरीत् । बोधिसत्त्वः द्वाभ्यामपि अववादं ददानः 'अहं युवां निःश्रृत्य जीवितं अलप्से युवाभ्यामपि सहायस्य कर्तव्यं मम कृतम् । इदानीं लुब्धो आगत्य युवां गृह्णीयात् । तस्मात् सौम्य शतपत्र ! त्वमात्मनः पुत्रकान् गृहीत्वा अन्यत्र याहि । त्वं हि सौम्य कच्छप ! उदकं प्रविश' इत्याह । ते तथा अकार्षुः ।

कच्छपो प्राविक्षत् वारि, कुरङ्गः प्राविक्षत् वनम् ।
शतपत्रो द्रुमाग्रात् दूरे पुत्रान् अपानैषीत् ॥

लुब्धः तत् स्थानं आगत्य किञ्चिद् अपसृत्य छिन्नप्रसेवकं गृहीत्वा दौर्मनस्यप्राप्तः आत्मनो गेहमगमत् । तेऽपि त्रयः सहायाः यावज्जीव विश्वासं अछित्त्वा यथाकर्म गताः ।

[शास्तेदं देशनमाहृत्य जातकं समवादीधपत् । 'तदा लुब्धो देवदत्तोऽभूत् । शतपत्रः शारीपुत्रः, कच्छपो मौद्गलायनः, कुरङ्गमृगः पुनरहमेव' इति ।]

इति कुरङ्गमृगजातकम् ।

(९) यवसकुणजातकम्

[इदं शास्ता जैत्रवने विहरन् देवदत्तस्याकृतज्ञतत्वमारभ्याऽचकथत् ।... शास्ता 'न भिक्षवः ! देवदत्त इदानीमेव पूर्वमपि अकृतज्ञ एव' इत्युक्त्वाऽतीतमाहार्षीत् ।]

अतीते वाराणस्यां ब्रह्मदत्ते राज्यं कुर्वति बोधिसत्त्वो हिमवत्प्रदेशे वृक्षकोष्ठकशकुनो भूत्वा न्यवृतत् । अथैकस्य सिंहस्य मांसं खादतः अस्थि गले अलगीत् । गलः उद्धमीत् । गोचरं ग्रहीतुं न शक्नोति, खरा वेदना वर्तन्ते । अथ एनं स शकुनः गोचरप्रसूतो

बन्धि। बोधिसत्तो नातिदूरे नाच्चासन्ने गच्छन्तो तं आदाय अरञ्ञं पाविसि। दूरं गतभावं ञत्वा पदं वञ्चेत्वा अञ्ञेन मग्गेन वातवेगेन गन्त्वा सिङ्गेन पसिब्बकं उक्खिपित्वा भूमियं पातेत्वा फालेत्वा कच्छपं नीहरि। सतपत्तोपि रुक्खा ओतरि। बोधिसत्तो द्विन्नम्पि ओवादं ददमानो 'अहं तुम्हे निस्साय जीवितं लभिं, तुम्हेहिपि सहायस्स कत्तब्बं मय्हं कतं, इदानि लुद्दो आगन्त्वा तुम्हे गण्हेय्य। तस्मा सम्म ! सतपत्त, त्वं अत्तनो पुत्तके गहेत्वा अञ्ञत्थ याहि। त्वं हि सम्म ! कच्छप उदकं पविसा' ति आह। ते तथा अकंसु।

कच्छपो पाविसि वारिं, कुरुङ्गो पाविसी वनं।
सतपत्तो दुमग्गम्हा दूरे पुत्तं अपानयी'ति॥

लुद्दो तं ठानं आगन्त्वा कञ्चि अपस्सित्वा छिन्नपसिब्बकं गहेत्वा दोमनस्सप्पत्तो अत्तनो गेहं अगमासि। तेपि तयो सहाया यावजीवं विस्सासं अछिन्दित्वा यथाकम्मं गता।

[सत्था इमं देसनं आहरित्वा जातकं समोधानेसि। 'तदा लुद्दो देवदत्तो अहोसि, सतपत्तो सारिपुत्तो, कच्छपो मोग्गल्लानो, कुरुङ्गमिगो पन अहमेवा'ति।]

खुरुङ्गमिगजातकं !

९–जवसकुणजातकं

[इदं सत्था जेतवने विहरन्तो देवदत्तस्स अकतञ्ञुतं आरब्भ कथेसि।... सत्था 'न भिक्खवे ! देवदत्तो इमानेव पुब्बेपि अकतञ्ञू येवा'ति वत्वा अतीतं आहरि।]

अतीते वाराणसियं ब्रह्मदत्ते रज्जं कारेन्ते बोधिसत्तो हिमवन्तपदेसे रुक्खकोट्टकसकुणो हुत्वा निब्बत्ति। अथेकस्स सीहस्स मंसं खादन्तस्स अट्ठि गले लग्गि। गलो उद्धमायि, गोचरं गण्हितुं न सक्कोति, खरा वेदना वत्तन्ति। अथ नं सो सकुणो गोचरपसुतो

दृट्ष्वा शाखायां निलीनः 'किं ते सौम्य ! दुःखम् ?' इत्यप्राक्षीत् । स तमर्थमाचख्यत् । 'अहं ते सौम्य ! एतद् अस्थि अपनयेयम् । भयेन पुनः ते मुखं प्रवेष्टुं न विषहामि ! खादेरपि मां' इति । 'मा भैषीः सौम्य ! नाहं त्वां खादामि, जीवितं मे देहि' इति स साध्विति तं पार्श्वेन निपाद्य 'को जानाति किमप्येष करिष्यति' इति चिन्तयित्वा यथा मुखं पिदधातुं न शक्नोति तथा तस्य अधरोष्ठे च उत्तरोष्ठे च दण्डकं स्थापयित्वा मुखं प्रविश्य अस्थिकोटिं तुण्डेन अपाहरीत् । अस्थि पतित्वा गतम् । स अस्थि पातयित्वा सिंहस्य मुखतो निष्कमन् दण्डकं तुण्डेन प्रहृत्य पातयन् निष्क्रम्य शाखाग्रे न्यलेष्ट । सिंहो नीरोगो भूत्वा एव दिवसे वनमहिषं हत्वा खादति शकुनो विमर्क्ष्यामि एनं इति तस्य उपरिभागे शाखायां निलीय तेन सार्धं संल्लपन् प्रथमां गाथामाह—

अकार्षं ते कृत्यं यद् बलं अभूत् ।
मृगराज ! नामो इत्यस्तु अपि किञ्चित् लभे ॥

तत् श्रुत्वा सिंहो द्वितीयां गाथामाह—

मम लोहितभक्षस्य नित्यं रुद्राणि कुर्वतः ।
दन्तान्तरगतः सन् तद् बहु यत् जीवसि ॥

तत् श्रुत्वा शकुनः इतरे द्वे गाथे अभाषीष्ट—

अकर्तज्ञं अकर्तारं कृतस्याप्रतिकारकम् ।
यस्मिन् कृतज्ञता नास्ति निरर्था तस्य सेवना ॥
यस्य सम्मुखचीर्णेन मित्रधर्मो न लभ्यते ।
अनसूय अनुक्रोशं शनैकैः तस्मात् अपक्रमेत् ॥

एवमुक्त्वा स शकुनो अपाक्रामीत् ।

[शास्तेदं देशनमाहृत्य जातकं समवादीधपत् । 'तदा सिंहो देवदत्तोऽभूत्, शकुनः पुनरहमेव' इति ।]

इति यवशकुनजातकम् ।

दिस्वा साखाय निलीनो 'किन्ते सम्म! दुक्ख'न्ति? पुच्छि। सो तं अत्थं आचिक्खि। 'अहं ते सम्म एतं अट्ठिं अपनेय्यं, भयेन पन ते मुखं पविसितुं न विसहामि, खादेय्यासिपि म'न्ति। 'मा भायि सम्म, नाहं तं खादामि, जीवितं मे देही'ति। सो 'साधू'ति तं पस्सेन निपज्जापेत्वा 'को जानाति किम्पेस करिस्सती'ति चिन्तेत्वा, यथा मुखं पिदहितुं न सक्कोति तथा तस्स अधरोट्ठे च उत्तरोट्ठे च दण्डकं ठपेत्वा मुखं पविसित्वा, अट्ठिकोटिं तुण्डेन पहरि। अट्ठि पतित्वा गतं। सो अट्ठिं पातेत्वा सीहस्स मुखतो निक्खमन्तो दण्डकं तुण्डेन पहरित्वा पातेन्तो निक्खमित्वा साखग्गे निलीयि। सीहो नीरोगो हुत्वा एकदिवसं वनमहिसं वधित्वा खादति। सकुणो 'वीमंसिस्सामि ना'न्ति तस्स उपरिभागे साखाय निलीयित्वा तेन सद्धिं सल्लपन्तो पठमं गाथमाह—

अकरम्हसे ते किच्चं यं बलं अहुवम्हसे।
मिगराज! नमो त्यत्थु, अपि किञ्चि लभाससे॥

तं सुत्वा सीहो दुतियं गाथमाह—

मम लोहितभक्खस्स निच्चं लुद्दानि कुब्बतो।
दन्तन्तरगतो सन्तो तं बहु यं हि जीवसी'ति॥

तं सुत्वा सकुणो इतरा द्वे गाथा अभासि—

अकतञ्ञुं अकत्तारं कतस्स अप्पतिकारकं।
यस्मिं कतञ्ञुता नत्थि, निरत्था तस्स सेवना॥
यस्स सम्मुखचिण्णेन मित्तधम्मो न लब्भति।
अनुसुय्यं अनक्कोसं सणिकं तम्हा अपक्कमे'ति॥

एवं वत्वा सो सकुणो पक्कामि।

[सत्था इमं देसनं आहरित्वा जातकं समोधानेसि। 'तदा सीहो देवदत्तो अहोसि। सकुणो पन अहमेवा'ति]

जवसकुणजातकं।

(१०) शशजातकम् ।

[इदं शास्ता जैत्रवने विहरन् सर्वपरिष्कारदानमारभ्याऽचकथत् ।··· शास्ता भक्तकृच्छ्रावसाने अनुमोदनं कुर्वन् 'उपासकाः तस्य प्रतिसौमनस्यं कर्तुं वर्तते इति । इदं हि दानं नाम पुराणकपण्डितानां वंशः । पुराणकपण्डिताः संप्राप्तयाचकेभ्यो जीवितं परित्यज्य आत्मनो मांसमप्यदुः' इति उक्त्वा तेन याचितोऽतीतमाहार्षीत् ।

अतीते वाराणस्यां ब्रह्मदत्ते राज्यं कुर्वति बोधिसत्त्वः शशयोन्यां निर्वृत्य अरण्ये वसति । तस्य पुनः अरण्यस्य एकतः पर्वतपादः, एकदो नदी, एकतः प्रत्यन्तग्रामकः । अपरेऽपि अस्य त्रयः सहायाः अभूवन्—मर्कटः, शृगालः, उद्र इति । ते चत्वारोऽपि पण्डिताः एकतो वसन्तः आत्मनः गोचरस्थाने गोचरं गृहीत्वा सायाह्नसमये एकतः सन्निपतन्ति । शशपण्डितः 'दानं दातव्यं, शीलं रक्षितव्यं, उपवसथकर्म कर्तव्यं' इति त्रयेभ्यो जनेभ्य अववादवशेन धर्मं दिशति । ते तस्य अववादं सम्प्रतीष्य आत्मनः आत्मनः निवासगुल्मं प्रविष्य वसन्ति । एवं काले गच्छति एकदिवसे बोधिसत्वः आकाशमवलोक्य चन्द्रं दृष्ट्वा 'श्वः उपवसथदिवसः' इति ज्ञात्वा इतरान् त्रीन् आह 'श्वः उपवसथः, यूयं त्रयोऽपि जनाः शीलं समादाय उपवसथिका भवत । शीले प्रतिष्ठाय दत्तदानं महाफलं भवति । तस्मात् याचके सम्प्राप्ते युष्माभिः खादितव्याहारतो दत्वा खादेत' इति । ते 'साधु' इति सम्प्रतीष्य आत्मनः वसनस्थानेषु उषित्वा पुनर्दिवसे तेषु उद्रः प्रात इव 'गोचरं पर्येषयिष्यामि' इति निष्कम्य गङ्गातीरं गतः । अथैको बाडिशिकः सप्तरोहितमत्स्यान् उद्धृत्य वल्ल्या आवृत्य नीत्वा गङ्गातीरे बालुकया प्रतिच्छाद्य मत्स्यान् गृह्णन् अधोगङ्गायां अभ्रशत् । उद्रो मत्स्यगन्धं घ्रात्वा बालुकां व्यूह्य मत्स्यान् दृष्ट्वा निहृत्य 'अस्ति नु खलु एषां स्वामिकः' इति त्रिकृत्वः घोषयित्वा स्वामिकं

१०—ससजातकं

[इदं सत्था जेतवने विहरन्तो सब्बपरिक्खारदानं आरब्भ कथेसि।... सत्था भत्ताकिच्चावसाने अनुमोदनं करोन्तो 'उपासका, तस्स पीतिसोमनस्सं कातुं वट्टती'ति। इदं हि दानं नाम पुराणकपण्डितानं वंसो। पुराणकपण्डिता हि संपत्तयाचकानं जीवितं परिच्चजित्वा अत्तनो मंसम्पि अदंसू'ति वत्वा तेन याचितो अतीतं आहरि।]

अतीते वाराणसिथं ब्रह्मदत्ते रज्जं कारेन्ते बोधिसत्तो ससयोनियं निब्बत्तित्वा अरञ्ञे वसति। तस्स पन अरञ्ञस्स एकतो पब्बतपादो, एकतो नदी, एकतो पच्चन्तगामको। आपरेपिस्स तयो सहाया अहेसुं—मक्कटो, सिगालो, उद्दो'ति। ते चत्तारोपि पण्डिता एकतो वसन्ता अत्तनो अत्तनो गोचरचट्ठाने गोचरं रहेत्वा, सायण्हसमये एकतो सन्निपतन्ति। ससपण्डितो 'दानं दातब्बं, सीलं रक्खितब्बं उपोसथकम्मं कातब्ब'न्ति तिन्नं जनानं ओवादवसेन धम्मं देसेति। ते तस्स ओवादं सम्पटिच्छित्वा अत्तनो अत्तनो निवासगुम्बं पविसित्वा वसन्ति। एवं काले गच्छन्ते एकदिवसं बोधिसत्तो आकासं ओलोकेत्वा चन्दं दिस्वा 'स्वे उपोसथदिवसो'ति ञत्वा इतरे तयो आह 'स्वे उपोसथो। तुम्हे तयोपि जना सीलं समादियित्वा उपोसथिका होथ। सीले पतिट्ठाय दिन्नदानं महप्फलं होति, तस्मा याचके सम्पत्ते तुम्हेहि खादितब्बाहारतो दत्वा खादेय्याथा'ति। ते साधू'ति सम्पटिच्छित्वा अत्तनो वसनट्ठानेसु वसित्वा पुनदिवसे तेसु उद्दो पातोव 'गोचरं परियेसिस्सामी'ति निक्खमित्वा गङ्गातीरं गतो। अथेको बाळिसिको सत्त रोहितमच्छे उद्धरित्वा वल्लिया आवुणित्वा नेत्वा गङ्गातीरे वालिकाय पटिच्छादेत्वा मच्छे गण्हन्तो अधो गङ्गं भस्सि। उद्दो मच्छगन्धं घायित्वा वालिकं वियूहित्वा मच्छे दिस्वा नीहरित्वा 'अत्थि नु खो इमेसं सामिको'ति तिक्खत्तुं घोसेत्वा सामिकं

अपश्यन् वल्लौ दृष्ट्वा आत्मनो वसनगुल्मे स्थापयित्वा 'वेलायामेव खादयिष्यामि' इति आत्मनः शीलं आवर्जयन् न्यपादि। शृगालोऽपि निष्क्रम्य गोचरं पर्येषयन् एकस्य क्षेत्रगोपकस्य कुटयां द्वौ मांसशूलौ एकां गोधां एक च दधिवारकं दृष्ट्वा 'अस्ति नु खलु एतस्य स्वामिकः' इति त्रिकृत्वः घोषयित्वा स्वामिकं अदृष्ट्वा दधिवारकस्य उद्ग्रहणरज्जुकं ग्रीवायां प्रवेश्य मांसशूलौ च गोधां च मुखेन दृष्ट्वा नीत्वा आत्मनः वसनगुल्मे स्थापयित्वा 'वेलायामेव खादिष्यामि इति आत्मनः शीलं आवर्जयन् न्यपादि। मर्कटोऽपि वनषण्डं प्रविश्य आम्रपिण्डीमाहृत्य वसदगुल्मे स्थापयित्वा 'वेलायामेव खादिष्यामि' इत्यामन' शीलमावर्जयन् न्यपादि। बोधिसत्वः पुनः 'वेलायामेव निष्क्रम्य दर्भतृणानि खादिष्यामि' इति आत्मनो गुल्मे एव निपन्नो अचिचिन्तत्। 'ममान्तिकं आगतानां याचकानां तृणानि दातुं न शक्यानि। तिलतण्डुलादयोऽपि मम न सन्ति। चेत् ममान्तिकं याचकः आगमिष्यति आत्मनः शरीरमांसं दास्यामि' इति तस्य शीलतेजसा शक्रस्य पाण्डुकम्बलशिलासनं उष्णाकारमददर्शत्। स आवर्ज्यमानः इदं कारणं दृष्ट्वा 'शशराजं विमर्क्ष्यामि' इति प्रथमं उद्रस्य 'वसनस्थानं गत्वा ब्राह्मणवेषेण अस्थात्। 'ब्राह्मण! किमर्थं स्थितोऽसि' इति च उक्ते 'पण्डित! चेत् किञ्चित् आहारं लभेय उपवसथिको भूत्वा श्रवणधर्मं कुर्याम्' इति। स 'साधु दास्यामि ते आहारम्' इति तेन सार्द्धं संल्लपन् प्रथमां गाथामाह—

सप्त मे रोहिता मत्स्याः उदकात् स्थलमुद्धृताः।
इदं ब्राह्मण! मे अस्ति एतद् भुक्त्वा वने वस इति।

ब्राह्मणो 'प्रात इव तावद् भवतु। पश्चात् ज्ञास्यामि' इति शृगालस्य अन्तिकं गतः। तेनापि 'किमर्थं स्थितोऽसि' इत्युक्ते तथैवाह। शृगालः 'साधु दास्यामि' इति तेन सार्धं संल्लपन् द्वितीयां गाथामाह—

अपस्सन्तो वल्लियं डसित्वा अत्तनो वसनगुम्बे ठपेत्वा 'वेलायं एव खादिस्सामी'ति अत्तनो सीलं अवज्जन्तो निपज्जि। सिगालोपि निक्खमित्वा गोचरं परियेसन्तो एकस्स खेत्तगोपकस्स कुटियं द्वे मंससूलानि, एकं गोधं, एकञ्च दधिवारकं दिस्वा 'अत्थि नु खो एतस्स सामिको'ति तिक्खत्तुं घोसेत्वा सामिकं अदिस्वा दधिवारकस्स उग्गहणरज्जुकं गीवाय पवेसेत्वा मंससूले च गोधञ्च मुखेन डसित्वा नेत्वा अत्तनो सयनगुम्बे ठपेत्वा 'वेलाणमेव खादिस्सामी'ति अत्तनो सीलं आवज्जन्तो निपज्जि। मक्कटोपि वनखण्डं पविसित्वा अम्बपिण्डि आहरित्वा वसनगुम्बे ठपेत्वा 'वेलायमेव खादिस्सामी'ति अत्तनो सीलं आवज्जन्तो निपज्जि। बोधिसत्तो पन 'वेलायमेव निक्खमित्वा दब्बतिणानि खादिस्सामी'ति अत्तनो गुम्बे येव निपन्नो चिन्तेसि 'मम सन्तिकं आगतानं याचकानं तिणानि दातुं न सक्का, तिलतण्डुलादयोपि मय्हं नत्थि। सचे मे सन्तिकं याचको आगच्छिस्सति, अत्तनो सरीरमंसं दस्सामी'ति तस्स सीलतेजेन सक्कस्स पण्डुकम्बलसिलासनं उण्हाकारं दस्सेसि। सो आवज्जमानो इमं कारणं दिस्वा 'ससराजं वीमंसिस्सामी'ति पठमं उद्दस्स वसनट्ठानं गन्त्वा ब्राह्मणवेसेन अट्ठासि। 'ब्राह्मण! किमत्थं ठितोसी'ति च वुत्ते 'पण्डित, सचे किञ्चि आहारं लभेय्यं उपोसथिको हुत्वा समणधम्मं करेय्यन्ति।' सो 'साधु, दस्सामि ते आहारन्ति' तेन सद्धिं सल्लपन्तो पठमं गाथमाह—

सत्त मे रोहिता मच्छा उदका थलमुब्भता।
इदं ब्राह्मण! मे अत्थि, एवं भुत्वा वने वसा'ति॥

ब्राह्मणो 'पातोव ताव होतु, पच्छा जानिस्सामी'ति सिगालस्स सन्तिकं गतो। तेनापि 'किमत्थं ठितोसी'सि वुत्ते तथेवाह। सिगालो 'साधु दस्सामी'ति तेन सद्धिं सल्लपन्तो दुतियं गाथमाह—

'दूष्मं मे क्षेत्रपालस्य रात्रिभक्तम् अपाभृतम् ।
मांसशूलौ च द्वौ गोधा एकं च दधिवारकम् ॥
इदं ब्राह्मण ! मे अस्ति एतद् भुक्त्वा वने वस'इति ।

ब्राह्मणः 'प्राप्त इव तावद् भवतु, पश्चात् ज्ञास्यामि' इयि मर्कटस्य अन्तिकं गतः । तेनापि, 'किमर्थं स्थितोऽसि' इति उक्ते तथैवाह । मर्कटः 'साधु दास्यामि' इति ते सार्धं संल्लपन् तृतीयां गाथामाह—

'आम्रपक्वोदकं शीतं शीतच्छायं मनोरमम् ।
इदं ब्राह्मण ! मे अस्ति एतद् भुक्त्वा वने वस'इति ॥

ब्राह्मणः प्राप्त इव तावद् भवतु, पश्चात् ज्ञास्यामि' इति शश-पण्डितस्य अन्तिकं गतः । तेनापि 'किमर्थं स्थितोऽसि इति उक्ते तथैव आह । तत् श्रुत्वा बोधिसत्त्वः सौमकेस्यप्राप्तः 'ब्राह्मण ! सुष्ठु त्वया कृतं आहारार्थाय ममान्तिकं आगच्छता । अद्याऽहं मया अदत्तपूर्वं दानं दास्यामि । त्वं पुनः शीलवान् प्राणातिपातं न करिष्यसि । गच्छ तात् ! दारूणि संकृष्य अङ्गरान् कृत्वा मम आरोचय । अहं आत्मनं परित्यज्य अङ्गारगर्भे पतिष्यामि । मम शरीरे पक्वे त्वं मांसं खादित्वा श्रवणधर्मं कुर्याः' इति तेन सार्धं संल्लपन् चतुर्थी गाथमाह—

न शशस्य तिलाः सन्ति न मुद्गाः नापि तण्डुलाः ।
अनेन अग्निना पक्वं मां भुक्त्वा वने वस' इति ॥

शक्रः तस्य कथां श्रुत्वा आत्मनः अनुभावेन एकं अङ्गरराशिं मापयित्वा बोधिसत्वस्य आरूरुचत् । स दर्भतृणशयनतः उत्थाय तत्र गत्वा 'चेन् मे लोमान्तरेषु प्राणकाः सन्ति ते मा वृषत्' इति उक्त्वा त्रिकृत्वः शरीरं विधूय स्वकशरीरं दानमुखे दत्वा लंधित्वा पद्मपुञ्जो राजहंस इव प्रमुदितचित्तः अङ्गारराशौ अपसत् । स पुनः अग्निः बोधिसत्त्वस्य शरीरे रोमकूपमात्रमपि उष्णं कर्तुं नाशकत् । हिमगर्भं प्रविष्ट इव अभूत् । अथ शक्रमामन्त्र्य 'ब्राह्मण !

दुस्सं मे खेत्तपालस्स रत्तिभत्तं अपाभतं ।
मंससूला च द्वे गाधा एकञ्च दधिवारकं ॥
इदं ब्राह्मण ! मे अत्थि, एत भुत्वा वने वासा'ति ।

ब्राह्मणो 'पातोव ताव, होतु, पच्छा जानिस्सामी'ति मक्कटस्स सन्तिकं गतो । तेनापि 'किमत्थं ठितोसी'ति वुत्त तथेवाह । मक्कटो 'साधु दस्सामी'ति तेन सद्धिं सल्लपन्तो ततियं गाथामाह—

'अम्बपक्कोदकं सीतं सीतच्छायं मनोरमं ।
इदं ब्राह्मण मे अस्थि, एतं भुत्वा वने वासा'ति ॥

ब्राह्मणो 'पातोव ताव, होतु पच्छा जानिस्सामी'नि सस-पण्डितस्य सन्तिकं गतो । तेनापि 'किमत्थं ठितासो'ति वुत्ते तथेवाह । तं सुत्वा बोधिसत्तो सोमनस्सप्पत्ता 'ब्राह्मण, सुट्ठु ते कतं आहारत्थाय मम सन्तिकं आगच्छन्तेन, अज्जाहं मया अदिन्नपुब्बं दानं दस्सामि । त्वं पन सोलवा पाणातिपातं न करिस्ससि । गच्छ तात, दारूनि सङ्कड्ढित्वा अङ्गारे कत्वा मय्हं आरोचेहि । अहं अत्तानं परिच्चजित्वा अङ्गारगब्भे पतिस्सामि । मम सरीरे पक्के त्वं मंसं खादित्वा समणधम्मं करेय्यासी'ति तेन सद्धिं सल्लपन्तो चतुत्थं गाथमाह—

न ससस्स तिला अस्थि न मुग्गा नापि तण्डुला ।
इमिना अग्गिना पक्कं ममं भुत्वा वने वसा'ति ॥

सक्का तस्स कथं सुत्वा अत्तनो आनुभावेन एकम् अङ्गररासिं मापेत्वा बोधिसत्तस्स आरोचेसि । सो दब्बतिणसयनतो उट्ठाय तत्थ गन्त्वा 'सचे मे लोमन्तरेसु पाणका अत्थि ते मा मरिंसू'ति चत्वा तिक्खत्तुं सरीरं विधूनित्वा सकसरीरं दानमुखे दत्वा लंधित्वा पदुमपुञ्ज राजहंसो विय पमुदितचित्ता अङ्गाररासिम्हि पति । सो पन अग्गि बोधिसत्तस्स सरीरे लोमकूपमत्तम्पि उण्हं कातु नासक्खि हिमगब्भं पविट्ठा विय अहोसि । अथ सक्कं आमन्तेत्वा 'ब्राह्मण,

त्वया कृतोऽग्निः अतिशीतलः । मम शरीरे रोमकूपमात्रमपि उष्णं कर्तुं न शक्नोति । 'किं नाम एतत्' इति आह । 'पण्डित नाहं ब्राह्मणः शक्रः अहमस्मि । तव बिमर्शनार्थाय आगतः' इति । 'शक्र ! त्वं तावत् तिष्ठ । सकलोऽपि चेल्लीकसन्निवासः मां दानेन बिमृशेत्, नैव मे अदातुकामतां पश्येत्' इति बोधिसत्वः सिंहनादं अनदीत् । अथैनं शक्रः 'शशपण्डित ! तव गुणः सकलकल्पं प्रकटो भवतु' इति पर्वतं पीडयित्वा पर्वतरसगादाय चन्द्रमण्डले शशलक्षणं आलिख्य बोधिसत्वं आमन्त्र्य तस्मिन् वनषण्डे तस्मिन्नेव वनगुल्मे तरुणदर्भतृणपृष्ठे निपाद्य आत्मनो देवस्थानमेव गतः । तेऽपि चत्वारः पण्डिताः सम्मोदमानाः शीलं पूरयित्वा उपवसथ-कर्म कृत्वा यथाकर्म गताः ।

[शास्तेदं देशनमाहृत्य सत्यानि प्रकाश्य जातकं समवादीधपत् । 'तदा उद्र आवन्दोऽभूत, शृगालो मौद्गलायनः, मर्कटः शारीपुत्रः, शशपण्डितोऽहमेव' इति ।

इतिशशजातकम् ।

—·— —

(११) मृतकभक्त-जातकम् ।

[इदं शास्ता जैत्रवने विहरन् मृतकभक्तमारभ्याऽचकथत् ।···शास्ता 'न भिक्षवः ! मृतकभक्त'' दास्यामः' इतिकृतेऽति प्राणातिपातो काचिद् वृद्धि नामा-पूर्वे पण्डिता आकाशे निषद्य धर्मं दिष्ट्वा अत्राऽऽदीनवं कथयित्वा सकलजम्बू-द्वीपवासिकैः एतत् कर्माजीहपन । इदानीं पुनः भवसंक्षेपगतत्वात् पुनः प्रादु-र्भूतम्' इत्युक्त्याऽतीतमाहाषीत् ।]

अतीते वाराणस्यां ब्रह्मदत्तो राज्यं कुर्वति एकः त्रयाणां वेदानां पारगः दिशाप्रामुख्यः आचार्यः ब्राह्मणः 'मृतकभक्तं दास्यामि' इति एकं क्षणं ग्राहयित्वा अन्तेवासिकानान् आह 'ताताः ! इमं एणकं नदीं नीत्वा स्नापयित्वा कण्ठे मालां परिक्षिप्य पञ्चाङ्गुलिकं दत्वा मण्डयित्वा

तया कतो अग्गि अतिसीतलो, मम सरीरे लोमकूपमत्तम्पि उण्हं कातुं न सक्कोति। किं नामेतन्ति आह। 'पण्डित, नाहं ब्राह्मणो सक्को अहमस्मि, तव वीमंसनत्थाय आगतो'ति। 'सक्क! त्वं ताव तिट्ठ, सकलोपि चे लोकसन्निवासो मं दानेन वीमंसेय्य, नेव मे अदातुकामतं पस्सेय्या'ति बोधिसत्तो सीहनादं नदि। अथ नं सक्को 'ससपण्डित, तव गुणो सकलकप्पं पाकटो होतू'ति पब्बतं पीळेत्वा पब्बतरसं आदाय चन्दमण्डले ससलक्खणं आलिखित्वा बोधिसत्तं आमन्तेत्वा तस्मिं वनसण्डे तस्मिं येव वनगुम्बे तरुणदब्बतिणपिट्ठे निपज्जापेत्वा अत्तनो देवट्ठानमेव गतो। तेपि चत्तारो पण्डिता सम्मोदमाना सीलं पूरेत्वा उपोसथकम्मं कत्वा यथाकम्मं गता।

[सत्था इमं देसनं आहरित्वा सच्चानि पकासेत्वा जातकं समोधानेसि। 'तदा उद्दो आनन्दो अहोसि, सिगालो मोग्गल्लानो, मक्कटो सारिपुत्तो, ससपण्डितो अहं एवा'ति।]

ससजातकं।

११—मतकभत्तजातकं

[इदं सत्था जेतवने विहरन्तो मतकभत्तमारब्भ कथेसि।...... सत्था 'न भिक्खवे, मतकभत्तं दस्सामीति कतेपि पाणातिपाते काचि वड्ढि नाम अत्थि। पुब्बे पण्डिता आकासे निसज्ज धम्मं देसेत्वा एत्थ आदीनवं कथेत्वा सकलजम्बुदीपवासिकं एतं कम्मं जहापेसुं। इदानि पन भवसंखेपगतत्ता पुन पातुभूत'न्ति वत्वा अतीतं आहरि।]

अतीते बाराणसियं ब्रह्मदत्ते रज्जं कारेन्ते एको तिण्णं वेदानं पारगू दिसापामोक्खो आचरियो ब्राह्मणो 'मतकभत्तं दस्सामी'ति एकं एळकं गाहापेत्वा अन्तेवासिके आह 'ताता, इमं एळकं नदिं नेत्वा नहापेत्वा कण्ठे मालं परिक्खिपित्वा पञ्चङ्गुलिकं दत्वा मण्डेत्वा

आनयेत, इति। ते साध्विति प्रतिश्रुत्य तमादाय नदीं गत्वा स्नापयित्वा, मण्डयित्वा नदीतीरे अतिष्ठिपन्। स एणकः आत्मनः पूर्वकर्म दृष्ट्वा 'एवंरूपात् नाम दुःखात् अद्य मोक्ष्ये' इति सौमनस्य-जातो घटं भिन्दन्निव महाहसितं हसित्वा पुनः 'अयं ब्राह्मणो मां घातयित्वा मया लब्धं दुःखं लप्स्यते' इति ब्राह्मणे कारुण्यं उत्पाद्य महता शब्देन प्रारोदीत्। अथ एनं ते माणवकाः अप्राक्षुः सौम्य एणक! त्वं महाशब्देन अहासीश्चैव अरोदीश्च। केन नु कारणेन अहासीः, केन कारणेन अरोदीः' इति। यूयं मां इमं कारणं आत्मनः आचार्याय अन्तिके पृच्छेत' इति। ते तमादाय गत्वेदं कारणं आचार्याय आरूरुचन्त। आचार्यस्तेषां वचनं श्रुत्वा एणकप्राक्षीत् 'कस्मात् त्वं एणक! असाहीः कस्मादरोदीः' इति। एणक आत्मनः कृतं कर्म जातिस्मरज्ञानेनानुश्रित्य ब्राह्मणायाचकथत्। 'अहं ब्राह्मण! पूर्वं त्वादृश इव मन्त्राध्यापकब्राह्मणो भूत्वा 'मृतकभक्तं दास्यामि' इति एणकं मारयित्वा अदाम्। सोऽहं एकस्य एणकस्य 'घातितत्वात् एकेन ऊनेषु पञ्चसु आत्मभावशतेषु शीर्षच्छेदं प्रापम्। अयं मे कोट्यां स्थितः पञ्चशततमः आत्मभावः। सोऽहं 'अद्य एवंरूपाद् दुःखात् मोक्ष्ये इति सौमनस्यजातः अनेन कारणेन अहासिषम्'। रुदन् पुनः 'अहं तावदेकमेणकं मारयित्वा पञ्चजातिशतानि शीर्षच्छेददुःखं प्राप्य अद्य तस्मात् दुःखात् मोक्ष्ये। अयं पुनः ब्राह्मणो मां मारयित्वा अहमिव पञ्चजातिशतानि शीर्षच्छेददुःखं लप्स्यते इति त्वयि कारुण्येन अरोदिषम्'इति। 'एणक! मा भैषीः,नाहं त्वां मारयिष्यामि' इति 'ब्राह्मण! किं वदसि त्वयि मारयति अपि अमारयति अपि न शक्यः अद्य मया मरणात् मोचयितुम्'इति। 'एणक मा भैषीः अहं ते आरक्षां गृहीत्वा त्वया सार्धमेव विचरिष्यामि' इति। ब्राह्मण, अप्रमत्तकः तवारक्षः मया कृतपापं पुनः महद् बलवद्' इति। ब्राह्मणः एणकं मुक्त्वा 'इमं एणकं कस्यचिदपि मारयितुं न दास्यामः, इति अन्ते-

आनेथा'ति । ते 'साधू'ति पटिसुणित्वा तं आदाय नदिं गन्त्वा नहापेत्वा मण्डेत्वा नदातीर ठपेसु । सो एळको अत्तनो पुब्बकम्मं दिस्वा 'एवरूपा नाम दुक्खा अज्ज मुञ्चिस्सामी'ति सोमनस्सजातो घटं भिन्दन्तो विय महाहसितं हसित्वा, पुन 'अयं ब्राह्मणो मं घातेत्वा मया लद्धं दुक्खं लभिस्सती'ति ब्राह्मणे कारुञ्ञं उप्पादेत्वा महन्तेन सद्देन परोदि । अथ नं ते माणवका पुच्छिंसु–'सम्म, एळक ! त्वं महा-सद्देन हसि चेव रोदि च, केन नु कारणेन हसि, केन कारणेन रोदी'ति ?' 'तुम्हे इमं कारणं अत्तनो आचरियस्स सन्तिके पुच्छेय्याथा'ति । ते तं आदाय गन्त्वा इदं कारणं आचरियस्स आरोचेसुं । आचरियो तेसं वचनं सुत्वा एळकं पुच्छि–'कस्मा त्वं एळक ! हसि, कस्मा रोदी'ति ?' एळको अत्तना कतकम्मं जातिस्सरञाणेन अनुस्सरित्वा ब्राह्मणस्स कथेसि—'अहं ब्राह्मण ! पुब्बे तादिसोव मन्तज्झायकब्राह्मणो हुत्वा 'मतकभत्तं दस्सामी'ति एळकं मारेत्वा अदासिं । स्वाहं एकस्स एळकस्स घातितत्ता एकेनूनेसु पञ्चसु अत्तभाव-सतेसु सीसच्छेदं पापुणिं । अयं मे कोटियं ठितो पञ्चसतिमो अत्त-भावो । स्वाहं 'अज्ज एवरूपा दुक्खा मुञ्चि-स्सामी'ति सोमनस्सजातो इमिना कारणेन हसिं ।' रोदन्तो पन 'अहं ताव एकं एळकं मारेत्वा पञ्चजातिसतानि सीसच्छेददुक्खं पत्वा अज्ज तस्मा दुक्खा मुञ्चि-स्सामि, अयं पन ब्राह्मणो मं मारेत्वा अहं विय पञ्चजातिसतानि सीसच्छेददुक्खं लभिस्सती'ति तयि कारुञ्ञेन रोदि'न्ति । 'एळक, मा भायि, नाहं तं मारेस्सामी'ति । 'ब्राह्मण, किं वदेसि, तयि मारेन्तेपि अमारेन्तेपि न सक्का अज्ज मया मरणा मुञ्चितु'न्ति । 'एळक, मा भायि, अहं ते आरक्खं गहेत्वा तया सद्धिं येव विचरिस्सामी'ति । ब्राह्मण, अप्पमत्तको तव आरक्खो, मया कतपापं पन महन्तं बलव'न्ति । ब्राह्मणो एळकं मुञ्चित्वा 'इमं एळकं कस्सचिपि मारेतुं न दस्सामी'ति अन्ते-

वासिकानादाय एणकेनैव सार्धं व्यचारीत् एणको विसृष्टमात्र एवैकं पाषाणपृष्ठं निःश्रित्य जातगुल्मे ग्रीवां उत्क्षिप्य पर्णानि खादितुमारब्धः। तत्क्षणमेव तस्मिन् पाषाणपृष्ठे अशनिः पतितः। एकां पाषाणशकलिकां छित्वा एणकस्य प्रसारितग्रीवायां पतित्वा शीर्षमच्छिदत्। महाजनः संन्यपतत्। तदा बोधिसत्त्वः तस्मिन् स्थाने वृक्षदेवता भूत्वा निर्वृत्तः। स पश्यतः एव तस्य महाजनस्य देवतानुभावेन आकाशे पर्यङ्केन निषद्य 'इमानि सत्वानि एवं पापस्य फलं जानन्तः अप्येव नाम प्राणातिपातं न कुर्युः' इति मधुरेण स्वरेण धर्मं दिशन् इमां गाथामाह—

'एवं चेत् सत्त्वानि जानीयुः दुःखाय जातिसम्भवः।
न प्राणी प्राणिनं हन्यात् प्राणघाती हि शोचति' इति॥

एवं महासत्त्वः निरभयेन तर्जयित्वा धर्मं अदिक्षत्। मनुष्यास्तत् धर्मदेशनं श्रुत्वा निरभयभीता प्राणातिपातात् व्यरंसिषुः। बोधिसत्त्वोऽपि धर्मं दिष्ट्वा महाजनं शीले प्रतिष्ठाप्य यथाकर्म गतः। महाजनोऽपि बोधिसत्वस्य अववादे स्थित्वा दानादीनि पुण्यानि कृत्वा देवनगरमपूपूरयन्।

शास्तेदं धर्मादेशनमाहृत्य अनुसन्धिं घटयित्वा जातकं समवादीधपत्। 'अहं तस्मिन् समये वृक्षदेवताऽभूवम्' इति।

इति मृतकभक्तजातम्।

— —

वासिके आदाय एळकेनेव सद्धिं विचरि। एळको विस्सट्ठमतीव एकं पासाणपिट्ठिं निस्साय जातगुम्बे गीवं उक्खिपित्वा पण्णानि खादितुं आरद्धो । तं खणं येव तस्मि पासाणपिट्ठे असनि पतिता ! एका पासाणसकलिका छिज्जित्वा एळकस्स पसारितगीवाय पतित्वा। सीसं छिन्दि। महाजनो सन्निपति । तदा बोधिसत्तो तस्मि ठाने रुक्खदेवता हुत्वा निब्बत्तो । सो पस्सन्तस्सेव तस्स महाजनस्स देवतानुभावेन आकासे पल्लङ्केन निसीदित्वा 'इमे सत्ता एवं पापस्स फलं जानमाना अप्पेव नाम पाणातिपातं न करेय्यु'न्ति मधुरेन सरेन सम्मं देसेन्तो इमं गाथमाह—

एवं चे सत्ता जानेय्युं दुक्खायं जातिसम्भवो।
न पाणो पाणिनं हञ्ञे, पाणघाती हि सोचती'ति ।।

एवं महासत्तो निरयभयेन तज्जेत्वा धम्मं देसेसि । मनुस्सा तं धम्मदेसनं सुत्वा निरयभयभीता पाणातिपाता विरमिंसु। बोधिसत्तोपि धम्मं देसेत्वा महाजनं सीले पतिट्ठापेत्वा यथाकम्मं गतो । महाजनोपि बोधिसत्तस्स ओवादे ठत्वा दानादीनि पुञ्ञानि कत्वा देवनगरं पूरेसि।

[सत्था इमं धम्मदेसनं आहरित्वा अनुसन्धिं घटेत्वा जातकं समोधानेसि। 'अहं तेन समयेन रुक्खदेवता अहोसि'न्ति ।]

मतकभत्तजातकं ।

———

(१२) बावेरु-जातकम् ।

[इदं शास्ता जैत्रवने विहरन् हतलब्धसत्कारान् तैर्थिकान् आरभ्याऽअचकथत्।··· शास्ता···'नभिक्षवः! इदानीमेव, पूर्वमपि यावद् गुणवन्तो नोत्पद्यन्ते तावन् निर्गुणा लाभाग्रयशोऽग्रप्राप्ता अभूवन्। गुणवत्सु पुनरुत्पन्नेषु निर्गुणहतलब्धसत्कारा जाताः' इत्युक्त्वाऽतीतमाहार्षीत्।]

अतीते वाराणस्यां ब्रह्मदत्ते राज्यं कुर्वति बोधिसत्त्वो मयूरयोन्यां निर्वृत्य बुद्धिमन्वेत्य सौभाग्यप्राप्तः अरण्ये व्यचारात्। तदा एकत्वे वणिजो दिशाकाकं गृहीत्वा नाव्या बावेरुराष्ट्रगमनम्। तस्मिन् किल काले बावेरुराष्ट्रे शकुना नाम न सन्ति। आगतागताः राष्ट्रवासिनस्तं कूपाग्रे निषण्णं दृष्ट्वा 'पश्यतास्य छविवर्णं गलपर्यवसानं मुखतुण्डकं मणिगुलसदृशे अक्षिणी' इति काकमेव प्रशस्य ते वणिजः अवोचन्। 'इमं आर्यः शकुनं अस्मभ्यं ददातु। अस्माकं हि अनेनार्थः। यूयं आत्मनो राष्ट्रे अन्यं लप्स्यध्वे' इति। 'तेन हि मूलेन गृह्णीत' इति। 'कार्षापणेन नो दत्त'। 'न दद्मः' इति। आनुपूर्व्येण वर्धयित्वा 'शतेन दत्त' इत्युक्ते 'अस्माकं एष बहूपकारः। युष्माभिः पुनः सार्धं मैत्री भवतु' इति कार्षापणशतं गृहीत्वा अदुः। ते तं गृहीत्वा सुवर्णपञ्जरे प्रक्षिप्य नानाप्रकारेण मत्स्यमांसेन चैव फलाफलेन च प्रत्यग्रहीषुः। अन्येषां शकुनानां अविद्यमानस्थाने दशभिः असद्धर्मैः समान्वागतः काकः लाभाग्रयशोग्रप्राप्तो अभूत्। पुनर्वारं ते वणिजः एकं मयूरराजं गृहीत्वा यथा अक्षरशब्देन वाश्यते, पाणिप्रहारशब्देन नृत्यते एवं शिक्षयित्वा बावेरुराष्ट्रमगमनम्। स महाजने सन्निपतिते नाव्या धुरि स्थित्वा पक्षौ विधूय मधुरस्वरं निस्सार्य अनर्तीत्। मनुष्याः तं दृष्ट्वा सौमनस्यजातः 'एतमार्या सौभाग्यप्राप्तं सुशिक्षितं शकुनराजं अस्माकं दत्त' इति अवोचन्त। 'अस्माभिः प्रथमं काकः आनीतः

१२–बावेरुजातकं

[इदं सत्था जेतवने विहरन्तो हतलाभसक्कारे तित्थिये आरब्भ कथेसि।— सत्था……'न भिक्खवे इदानेव पुब्बेपि याव गुणवन्ता न उपज्जन्ति ताव निग्गुणा लाभग्गयसग्गप्पत्ता अहेसुं। गुणवन्तेसु पन उप्पन्नेसु निग्गुणा हतलाभसक्कारा जाता'ति वत्वा अतीतं आहरि।]

अतीते वाराणसियं ब्रह्मदत्ते रज्जं कारेन्ते बोधिसत्तो मोरयोनियं निब्बत्तित्वा बुद्धिं अन्वाय सोभग्गप्पत्तो अरञ्ञे विचरि। तदा एकच्चे वाणिजा दिसाकाकं गहेत्वा नावाय बावेरुरट्ठं अगमंसु। तस्मिं किर काले बावेरुरट्ठे सकुणा नाम नत्थि। आगतागता रट्ठवासिनो तं कूपग्गे निसिन्नं दिस्वा 'पस्सथियमस्स छविवण्णं, गलपरियोसानं मुखतुण्डकं मणिगुलसदिसानि अक्खीनी'ति काकमेव पसंसित्वा ते वाणिजके आहंसु 'इमं अय्यो सकुणं अम्हाकं देथ। अम्हाकं हि इमिना अत्थो, तुम्हे अत्तनो रट्ठे अञ्ञं लभिस्सथा'ति। 'तेन हि मूलेन गण्हथा'ति। 'कहापणेन नो देथा'ति। 'न देमा'ति। अनुपुब्बेन वड्ढेत्वा 'सतेन देथा'ति वुत्ते अम्हाकं एस बहूपकारो, तुम्हेहि पन सद्धिं मेत्ती होतू'ति कहापणसतं गहेत्वा अदंसु। ते तं गहेत्वा सुवण्णपञ्जरे पक्खिपित्वा नानप्पकारेन मच्छमंसेन चेव फलाफलेन च पटिजग्गिंसु। अञ्ञेसं सकुणानं अविज्जमानट्ठाने दसहि असद्धम्मेहि समन्नागतो काको लाभग्गयसग्गप्पत्तो अहोसि। पुनवारे ते वाणिजा एकं मयूरराजानं गहेत्वा यथा अच्छरासद्देन वस्सति पाणिप्पहारसद्देन नच्चति एवं सिक्खापेत्वा, बावेरुरट्ठं अगमंसु। सो महाजने सन्निपतिते नावाय धुरं ठप्पा पक्खे विधूनित्वा मधुरस्सरं निच्छारेत्वा नच्चि। मनुस्सा तं दिस्वा सोमनस्सजाता 'एतं अय्या! सोभग्गप्पत्तं सुसिक्खितं सकुणराजानं अम्हाकं देथा'ति आहंसु। 'अम्हेहि पठमं काको आनीतो

तमग्रहीष्ट। इदानीमेतं मयूरराजं आनैषिष्म, एतमपि याचथ। युष्माकं राष्ट्रे शकुनं नाम गृहीत्वा आगन्तुं न शक्यं' इति। 'भवतु आर्याः आत्मनो राष्ट्रे अन्यं लप्स्यते। इमं नो ददातु' इति मूल्यं वर्धयित्वा सहस्रेण अग्रहीषुः। अथैनं सप्तरत्नविचित्रे पिञ्जरे स्थापयित्वा मत्स्यमांसफलाफलैः चैव मधुलाजशर्करापानकादिभिश्च प्रत्यग्रहीषुः। मयूरराजः लाभग्रयशोग्रप्राप्तः जातः। तस्यागतकालतः प्रस्थाय काकस्य लाभसत्कारो पर्यहायि। कश्चिदेनं अवलोकयितुमपि नैच्छत्। काकः खादनीय भोजनीयं अलभमानः काका इति वाश्यमानो गत्वा उत्कारभूमौ अवातरीत्।

अदर्शनेन मयूरस्य शिखिणो मञ्जुभाषिणः।
काकं तत्र आपूपुजन् मांसेन च फलेन च॥
यदा च स्वरसम्पन्नः मयूरो बावेरुमागमत्।
अथ लाभश्च सत्कारो वायसस्य अहायि॥
यावन् नोत्पद्यते बुद्धो धर्मराजः प्रभाकरः।
तावत् अन्ये अपूज्यन्त पृथुश्रमणब्राह्मणः॥
यदा च स्वरसम्पन्नो बुद्धो धर्ममादेक्षत्।
अथ लाभश्च सत्कारः तैर्थिकानां अहायि॥

इमाश्चतस्रः गाथा भाषित्वा जातकं समवादीधपत्। 'तदा काको निर्ग्रन्थो नाथपुत्रोऽभूत्! मयूरराजोऽइमेव' इति।]

इति बावेरुजातकम्।

———

तं गण्हित्थ, इदानि एतं मोरराजानं आनयिम्ह, एतम्पि याचथ, तुम्हाकं रट्ठे सकुणं नाम गहेत्वा आगन्तुं न सक्का'ति। 'होतु अय्यो, अत्तनो रट्ठे अञ्ञं लभिस्सथ, इमं नो देथा'ति मूलं वड्ढेत्वा सहस्सेन गण्हिंसु। अथ नं सत्तरतनविचित्ते पञ्जरे ठपेत्वा मच्छमंसफलाफलेहि चेव मधुलाजसक्खरापानकादीहि च पटिजग्गिंसु। मयूरराजा लाभग्गयसग्गप्पत्तो जातो। तस्सागतकालतो पट्ठाय काकस्स लाभसक्कारो परिहायि, कोचि नं आलोकेतुम्पि न इच्छि। काको खादनियं भोजनियं अलभमानो 'काका'ति वस्सन्तो गन्त्वा उक्कारभूमियं ओतरि।

अदस्सनेन मोरस्स सिखिनो मञ्जुभाणिनो।
काकं तत्थ अपूजेसुं मंसेन च फलेन च॥ १॥
यदा च सरसम्पन्नो मोरो बावेरुमागमा।
अथ लाभो च सक्कारो वायसस्स अहायथ॥ २॥
याव नुप्पज्जति बुद्धो धम्मराजा पभङ्करो।
याव अञ्ञे अपूजेसुं पुथू समणब्राह्मणे॥ ३॥
यदा च सरसम्पन्नो बुद्धो धम्मं अदेसयि।
अथ लाभो च सक्कारो तित्थियानं अहायथा'ति॥ ४॥

[इमा चतस्सो गाथा भासित्वा जातकं समोधानेसि। तदा 'काको निकण्ठो नाथपुत्तो अहोसि, मोरराजा अहमेवा'ति।]

बावेरुजातकं।

—:o:—

(१३) बलाहाश्वजातकम् ।

[इदं शास्ता जैत्रवने विहरन् एकमुत्कण्ठितभिक्षुमारभ्याऽचकथत् । स हि भिक्षुः शास्त्रा 'सत्यं किल त्वं भिक्षो ! उत्कण्ठितः' पृष्टः 'सत्यं' इत्युक्त्वा 'किंकारणात्' इत्युक्ते 'एकं अलंकृतमातृग्रामं दृष्ट्वा किलैषा वासना' इत्याह । अथैनं शास्ता 'स्त्रियो नामैता भिक्षो ! ''पुरुषान् प्रलोभ्य'''यक्षिण्य'''इत्युच्यन्ते । पूर्वमपि हि यक्षिण्यो ''वणिजः उपलोभ्य पुनः'''अन्यान् पुरुषान् दृष्ट्वा ते सर्वेऽपि जीवितक्षयं प्रापय्यः'''अखादिषु' इत्युक्त्वा अतीतमाहार्षीत् ।]

